# Critical Edition of the *Vijñānādvaitavāda* Section of Bhaṭṭa Jayanta's *Nyāyamañjarī*

Kei KATAOKA

## Introduction

Bhaṭṭa Jayanta, as he calls himself in his drama *Āgamaḍambara*,(1) is a Kashmirian scholar of around the latter half of the ninth century,(2) famous for his Nyāya work, *Nyāyamañjarī*, which as far as the form is concerned is a commentary on important sūtras selected from the *Nyāyasūtra*, and as far as the content is concerned, as he states himself, aims at establishing the Vedas' authority (*vedaprāmāṇya*) threatened by heretics such as Buddhists.(3)

The section edited in this article, which I tentatively call *Vijñānādvaitavāda*, formally belongs to the chapter on *apavarga* or liberation and as for its content deals with the so-called *ākāravāda* or theory of form, i.e. subjective or objective image which appears in cognition. This was one of the main issues of dispute between Buddhism and brahmanical orthodox schools, in particular, Mīmāṃsā, at least since the Vṛttikāra's argument against Buddhists as reported in Śabarasvāmin's commentary, *Śābarabhāṣya* (around the first half of the sixth century). The relevant portion of the *Śābarabhāṣya* is called *śūnyavāda* by the commentator Kumārila (around the first half of the seventh century) in his *Ślokavārttika*, in which it is further discussed in detail. Jayanta, a Naiyāyika well-versed in

Mīmāṃsā and often presenting in the *Nyāyamañjarī* good digests of Kumārila's views as one of his opponents, naturally refers to Kumārila's view concerning the present issue of *ākāravāda* and actually is dependent on him to an astonishing degree. In editing this section, therefore, I made a particular effort to trace relevant passages of the *śūnyavāda*-chapter of Kumārila's *Ślokavārttika.*

The text of the entire *Nyāyamañjarī* has been edited, as far as I noticed, six times.(4) But of the five editions which I consult here, only the Vizianagaram Sanskrit Series edition and the Mysore edition, abbreviated here as V and M, claim to be based on manuscripts. The latter, though it changed the miserable convention up to that time of copying a previous edition without consulting manuscripts, still can be improved with the help of manuscripts, both those which have already been consulted and other as yet unconsulted ones. Aside from the five editions, I consult here three manuscripts.(5)

## Consulted editions and abbreviations

V　The *Nyāyamañjarī of Jayanta Bhaṭṭa.* 2 parts. Ed. Gaṅgādhara Śāstrī Tailaṅga. Vizianagaram Sanskrit Series, No. 10. Benares: E.J. Lazarus & Co., 1895, 1896. Our text corresponds to pp. 536.23-544.25. According to the *bhūmikā* p. 5, this edition is based on two manuscripts from Benares and Poona.

S　*Nyāyamañjarī of Jayantabhatta.* 2 parts. Ed. Sūrya Nārāyaṇa Śukla. Kashi Sanskrit Series, No. 106. Benares: Jaya Krshna Das Haridas Gupta, 1934, 1936. Part 2, pp. 103.26-110.23.

$S^2$ *Nyāyamañjarī of Jayantabhatta.* 2 parts. Ed. Sūrya Nārāyaṇa Śukla (Part I), Sūrya Nārāyaṇa Śukla and A. Madhvācārya Ādya (Part II). Kashi Sanskrit Series, No. 106. Varanasi: Chowkhamba Sanskrit Series Office, 1971, 1969. Part 2, pp. 103.26-110.23. This is the second edition of S and almost the same as the first edition except for some mistakes newly added. So I report $S^2$ only when it is different from S.

M *Nyāyamañjarī of Jayantabhaṭṭa with Ṭippaṇi — Nyāyasaurabha by the Editor.* Ed. K.S. Varadācārya. 2 vols. Mysore: Oriental Research Institute, 1969, 1983. Part 2, pp. 487.12-504.21. According to the prastāvanā in the first volume, this edition is based on two manuscripts: "ka" preserved in Oriental Research Insitute, Mysore, which is not registered in the present manuscript catalogue of ORI, and "ga" owned by Ātmakūru Dīkṣācārya. "kha" is also reported as a published edition (*mudritakośaḥ*), but it is not clear which of the two editions, V or S, is referred to. However, S seems a more probable candidate, because it would probably have been more easily available for the editor. According to the *bhūmikā* of the second volume, three manuscripts are additionally consulted: "gha" of Adyar Library; "ṅa" of Government Oriental Manuscript Library; "ca" of Ganganatha Jha Kendriya Sanskrit Vidyapeetha, Allahabad, which is reported in the first volume, too, in the *pāṭhāntarāṇi* list given in the end of the first volume, but unfortunately mixed up with editor's own *śodhanāni* corrections.

$M^{ga}$ Variants reported in M as "ga", a transcript owned by Ātmakūru Dīkṣācārya, according to the *prastāvanā* in the first volume.

$M^{gha}$ Variants reported in M as “gha”, a manuscript preserved in Adyar Library, according to the *bhūmikā* of the second volume.

N *Jayanta Bhaṭṭa's Nyāyamañjarī with Gujarati Translation.* 5 volumes. Ed. Nagin J. Shah. Ahmedabad: L. D. Institute of Indology, 1975, 1978, 1984, 1989, 1992. Vol.5, pp. 385.16-404.14.

G *Nyāyamañjarī of Jayanta Bhaṭṭa with the Commentary of Granthibhaṅga by Cakradhara.* 3 parts. Ed. Gaurinath Sastri. Varanasi: Sampurnanand Sanskrit Vishvavidyalaya, 1982, 1983, 1984. Part 3, pp. 44.11-54.20.

## Consulted manuscripts and abbreviations

$A_1$ A manuscript preserved in the Ganganatha Jha Kendriya Sanskrit Vidyapeetha, Allahabad, No. 833/52. Devanāgarī. Paper. Complete. 660 folios. ff. 542r4-549v2. Variants of this manuscript are reported in M as “ca”; but as far as our portion is concerned, the variants reported in the footnotes of M are not actually found in the Allahabad manuscript $A_1$ but sometimes found in the Chennai Manuscript $C_1$. There might have been some confusion.

$B_1$ A manuscript preserved in Banaras Hindu University, S. No. 3C/2435, Accn. No. C1015. Kashmirian Devanāgarī. Paper. Complete. 35.0×20.2 cm. 80 folios. ff. 64r14-67r3 (according to the folio number given in the original manuscript).

$C_1$ A manuscript preserved in Government Oriental Manuscript Library, Madras (Chennai), R 3583. Malayalam. Palm Leaf. 130 folios. Incomplete. ff. 65r4-71r7.

## Primary texts referred to

*Nyāyamañjarī*. See M.

*Nyāyamañjarīgranthibhaṅga*: *Nyāyamañjarīgranthibhaṅga*. Ed. Nagin J. Shah. Ahmedabad: L.D. Institute of Indology, 1972.

*Pramāṇavārttika: Pramānavārttika of Ācharya Dharmakirtti with the Commentary 'Vritti' of Ācharya Manorathanandin*. Ed. Dvārikadāsa Śāstrī. Varanasi: Bauddha Bharati, [2]1984.

*Pramāṇavārttikasvavṛtti: The Pramāṇavārttikam of Dharmakīrti*. Ed. Raniero Gnoli. Roma: Istituto Italiano per il Medio ed Estremo Oriente, 1960.

*Pramāṇaviniścaya I:* T. Vetter. *Dharmakīrti's Pramāṇaviniścaya, I. Kapitel: Pratyakṣam*. Wien: Österreichische Akademie der Wissenschaften, 1966.

*Pramāṇasamuccaya*: Masaaki Hattori. *Dignāga, On Perception*. Cambridge: Harvard University Press, 1968.

*Vākyapadīya: Bhartṛharis Vākyapadīya*. Ed. Wilhelm Rau. Wiesbaden: Franz Steiner, 1977.

*Ślokavārttika*: I prepared my own edition on the basis of two editions and four manuscripts; but here I quote from it without reporting variants: *Ślokavārttika of Śrī Kumārila Bhaṭṭa with the Commentary Nyāyaratnākara of Śrī Pārthasārathi Miśra*. Ed. Swāmī Dvārikadāsa Śāstrī. Varanasi: Tara Publications, 1978; *Ślokavārttikavyākhyā Tātparyaṭīkā of Uṃveka Bhaṭṭa*. Ed. S.K. Rāmanātha Śāstrī. Rev. K. Kunjuni Raja & R. Thangaswamy.

Madras: University of Madras, ²1971; Manuscripts preserved in the British Library (India Office), No. 2149, Burnell 1449b; No. 7976, Burnell 3739; A manuscript preserved in the National Archive, Kathmandu, No. 4-1299 (NGMPP A 64/3); A manuscript preserved in the Sarasvati Mahal Library, Sampurnanand Sanskrit Vishvavidyalaya, Varanasi, No. 29689.

## Other abbreviations

ac　Readings before correction (*ante correctionem*).

pc　Readings after correction (*post correctionem*).

(eyeskip)　The variant is caused by eyeskip.

(marked)　The variant is marked with a dot above the letter without correction.

(unmetrical)　The variant reading is unmetrical.

em.　Emendation by the editor.

om.　Omission of the reading.

## Conventions used in the edition

There are three layers on each page except for the pages on which the second is not necessary. The first layer gives the edited text. The division into sections and paragraphs is mine. Numbers and Sanskrit subtitles in brackets are given in the beginning of each section, subsection, subsubsection and so on according to the structure of the text in order to clarify the context and correlate the present edition with the future

translation. The punctuation, using daṇḍas and commas, is mine.

The second layer shows quoted or parallel passages of Jayanta's predecessors, i.e. Kumārila, Dharmakīrti and other authors, as well as Jayanta's *Nyāyamañjarī* itself; cross-references inside the text are also reported here; testimonia found in Cakradhara's commentary *Nyāyamañjarīgranthibhaṅga* are included in this apparatus.

The third layer is the critical apparatus for variants. The critical apparatus is positive: each reading is repeated after the line number in the edition and followed by a lemma sign ']'. This is followed by the siglum of editions and manuscripts which have the accepted reading. After semicolon the variant is given with the siglum of the edition/manuscript. For example:

*anupajanam*] GSV$C_1$; *anupajananam* MN ; *anupajānam* $A_1B_1$

This means that G, S and V and one manuscript $C_1$ have the accepted reading *anupajanam*, while two editions M and N have the variant *anupajananam* and two manuscripts $A_1$ and $B_1$ have the variant *anupajānam*.

I have not reported the punctuation and non-substantive variants of the editions and manuscripts, e.g. the non-application of sandhi or common orthographic variants such as gemination or degemination of consonants after or before semivowels, and the exchange of anusvāraḥ and homorganic nasals. However I reproduce them when a reading of an edition or a manuscript is quoted as a substantive variant. For this convention I follow Isaacson [2002:155].(6)

## Acknowledgment

First of all I would like to express my sincere gratitude to Dr. Négyesi Mária, Dr. Imre Bangha and Mr. Csaba Dezső for organizing the First International Intensive Sanskrit Summer Retreat in Transylvania in 2002, for which I first undertook to prepare the present edition. I also thank Dr. Dominic Goodall, Dr. Somdev Vasudeva, Mr. Alex Watson, Mr. Takamichi Fujii and other friends for suggestions given to me in the reading sessions there. I am indebted to the following libraries and institutes for giving me permission to consult manuscripts: Ganganatha Jha Kendriya Sanskrit Vidyapeetha, Allahabad; Central Library of Banaras Hindu University, Varanasi; Government Oriental Manuscript Library, Madras (Chennai). I also thank the Mitsubishi Foundation for funding in carrying out a part of this study. Last but not least I am much obliged to Prof. Dr. Harunaga Isaacson for his comments on my final draft.

1 *Āgamaḍambara Otherwise Called Ṣaṇmatanāṭaka of Jayanta Bhaṭṭa*. Ed. V. Raghavan & Anantalal Thakur. Darbhanga: Mithila Institute, 1964, 2.23.

2 See Introduction of the *Āgamaḍambara*.

3 See Kei Kataoka. "What really protects the Vedas? —— Jayanta on *Śāstra-prayojana* ——." *Journal of the Ganga Nath Jha Kendriya Sanskrit Vidyapeetha, Allahabad*, 56, 226-251.

4 I could not consult the Calcutta edition. *Nyāyamañjarī*. Ed. Pañcānana Tarkabāgīśa. 2 volumes. Calcutta: Calcutta University, 1939-1941.

5 Unfortunately I have not been able to consult any Śāradā manuscript. We know of three probably important manuscripts in the Sanskrit Manuscript Library, Srinagar. Ser. No. 2650, Acc. No. 1088, 160ff; Ser. No. 2651, Acc. No. 1933,

98ff; Ser. No. 2652, Acc. No. 2179, 64ff.

6 Harunaga Isaacson. Ratnākaraśānti's *Bhramaharanāma Hevajrasādhana*: Critical Edition (Studies in Ratnākaraśānti's tantric works III). *Journal of the International College for Advanced Buddhist Studies*, 5, 2002.

# न्यायमञ्जरी ।

# विज्ञानाद्वैतवादः

## [1 सङ्गतिः]

एवं स्थितेषु सर्वेषु तूष्णीमद्वैतवादिषु ।
विज्ञानाद्वैतवादी तु पुनः प्रत्यवतिष्ठते ॥

सत्यम् अनुपजनम् अनपायम् एकम् अपरिमितम् अद्वयं ब्रह्म न युक्तिमद् इति युक्त एव तदनभ्युपगमः । विज्ञानमेव तु क्षणिकम् उपजनापायधर्मकम् अनादिसन्तानप्रबन्धप्रवृत्तमिदं तथा तथाऽवभातीति न ततो द्वितीयमर्थरूपं नाम किंचिदस्तीति पश्यामः ।

## [2 सन्देहः]

ननु प्रत्यक्षादिना प्रमाणेन परस्परविसदृशपदार्थस्वरूपसंवेदनस्य दर्शितत्वात् कथं विज्ञानस्यायमवभासः , अर्थाभावे तत्स्वरू-

---

**3** प्रत्यवतिष्ठते ] Cf. *Ślokavārttika śūnya*, v. 1d: परः प्रत्यवतिष्ठते
**10** दर्शितत्वात् ] *Nyāyamañjarī* II 471.9–11: तस्मादितरेतरविविक्तपदार्थस्वरूपग्राहित्वान्नाभेदविषयं प्रत्यक्षम् । शब्दानुमानयोस्तु …

---

**2** °द्वैत° ] GMNSVB$_1$C$_1$ ; °द्वेत° A$_1$ **3** विज्ञानाद्वैतवादी ] GNSVA$_1$C$_1$ ; विद्वानाद्वैतवादी M; विज्ञानावैतवादी B$_1$ **4** अनुपजनम् ] GSVC$_1$ ; अनुपजननम् MN; अनुपजानम् A$_1$B$_1$ **4** अनपायम् एकम् ] GSVA$_1$B$_1$C$_1$ ; अनपायम् MN **4** अपरिमितम् अद्वयं ] GMNSVC$_1$ ; अपरिमितद्वय A$_1$ ; अपरिमितम् अद्वय B$_1$ **4** न ] GMNSVA$_1$C$_1$ ; ण B$_1$ **5** युक्तिमद् इति ] GMNSVA$_1$C$_1$ ; युक्तिमदति B$_1$ **6** उपजनापायधर्मकम् ] GSVB$_1$C$_1$ ; उपजननापायधर्मकम् MN; उपजनमनपायमेकपरिमितद्वयब्रह्मेनापायधर्मकम् A$_1$ **6** तथा तथाऽव° ] GMNSVB$_1$C$_1$ ; तथाव° A$_1$ **9** °स्वरूप° ] MA$_1$B$_1$C$_1$ ; °रूप° GNSV **10** दर्शितत्वात् ] MNSVA$_1$C$_1$ ; दर्शतत्वात् B$_1$

पानुपपत्तेः। ग्राह्यग्रहणं हि नाम विज्ञानं भवति, न ग्रहणग्रहणमिति।

उच्यते। इदं तावत्परीक्ष्यताम् — यदेतत्प्रत्यक्षविज्ञानं "नीलमिदम्" "पीतमिदम्" इत्युत्पद्यते, तत्र किमेक आकारः प्रकाशत उत द्वितयम् — इति। यदि द्वितयमवभाति "अयमर्थो नीलम्" "इदं तज्ज्ञानम्" इति, तत् किमत्र विचार्यते, जितं भवद्भिः। जितस्य यदापद्यते, तदस्मासु विधीयताम्। अथैक एवायमाकारः प्रथते, तर्ह्यस्ति विचारावसरः — कस्यायमाकारः

---

1 तत्स्वरूपा॰ ] Cf. *Nyāyamañjarī* II 471.5: अन्यरूपनिषेधमन्तरेण तत्स्वरूपपरिच्छेदस्याप्यसंपत्तेः।

1 न ग्रहणग्रहणमिति ] *Nyāyamañjarīgranthibhaṅga*: न ग्रहणग्रहणम्। स्वरूपग्रहणमित्यर्थः।

3 इदं तावत्परीक्ष्यताम् ] *Ślokavārttika śūnya*, v. 2d: तदिदानीं परीक्ष्यताम्॥

5 यदि द्वितयमवभाति ] Cf. *Ślokavārttika śūnya*, v. 6ab: न चाप्याकारभेदेन ज्ञानज्ञेयावधारणा।

---

**1** ॰पपत्तेः ] GMNSVB$_1$C$_1$; ॰पपत्ते A$_1$ **1** ग्राह्य॰ ] GMNSVA$_1$C$_1$; ग्राहि॰ B$_1$ **1** नाम विज्ञानं ] MNC$_1$; विज्ञानं नाम GSVA$_1$B$_1$ **1** न ग्रहण॰ ] MNC$_1$; ना॰ GSV; नाग्रहण॰ A$_1$B$_1$ **3** ॰रीक्ष्यताम् ] GMNSVA$_1$C$_1$; ॰रीक्षितां B$_1$ **4** "नीलमिदम्" "पीतमिदम्" इत्युत्पद्यते ] MNC$_1$; नीलमिदमुत्पद्यते A$_1$; नीलमिदं पीतमिदमुत्पद्यते GSVB$_1$ **4** आकारः ] GMNSVA$_1$B$_1$C$_1$; आकाशः S$^2$ **5** उत ] GMNSVA$_1$C$_1$; तत B$_1$ **5** द्वितयम् ] MN; द्वितीय G; द्वितीयम् SVA$_1$B$_1$C$_1$ **5** द्वितयम॰ ] MNC$_1$; द्वितीयो ऽ॰ G; द्वितीयम॰ SVA$_1$B$_1$ **6** "अयमर्थो नीलम्" ] GMNSB$_1$; अयमर्थे नीलम् V; अयमर्थेलम् A$_1$; अर्थो नील C$_1$ **6** तज्ज्ञान॰ ] GMNSVA$_1$B$_1$; ज्ञान॰ C$_1$ **6** किमत्र विचार्यते ] GMNSVB$_1$C$_1$; किमत्र×कारः किमर्थस्य किं ज्ञानस्येति×चार्यंते A$_1$ **7** अथैक ] GMNSVC$_1$; अर्थैक A$_1$; अथैकम् B$_1$ **8** एवायमाकारः ] MNC$_1$; एव आकारः G; एवमाकारः SVA$_1$B$_1$ **8** प्रथते ] GMNSVB$_1$C$_1$; प्रथंते A$_1$ **8** कस्यायमाकारः ] GMNSVA$_1$B$_1$; om. C$_1$

किमर्थस्य किं ज्ञानस्य — इति। स चैवं विचार्यमाण आकारो यद्यर्थस्येति स्थास्यति, तद् भवन्तो जेष्यन्ति। ज्ञानाकारपक्षे तु वयं जेष्याम इति।

### [3 पूर्वपक्षः]

किं तावदत्र युक्तम्। ज्ञानस्यायमाकार इति। कुतः।

### [3.1 कल्पनालाघवात्]

कल्पना भवति ह्यल्पीयसीति। अर्थाकारपक्षे ह्यर्थस्य जडात्मनः प्रकाशायोगात् तस्य ग्राह्यत्वमन्यथा न स्यादिति ग्राहकान्तरपरिकल्पनाऽवश्यंभाविनीति कल्पनाद्वैगुण्यम्।

---

1 किमर्थस्य किं ज्ञानस्य ] *Ślokavārttika śūnya*, v. 6cd: न चान्यतरधर्मत्वं विस्पष्टं तस्य गृह्यते॥
1 स चैवं ··· जेष्याम इति ] *Ślokavārttika śūnya*, vv. 8–9: अतः परीक्षमाणानां ज्ञानमाकारवद् यदि। तन्मात्रे च प्रमा क्षीणा, ततो नास्त्यर्थकल्पना॥ यदि त्वाकारवत्ता स्याद् बाह्यस्यैवेह वस्तुनः। तदस्ति गृह्यमाणत्वात्, तत्सिद्ध्यैवास्ति धीरपि॥
5 किं ··· कुतः ] *Ślokavārttika śūnya*, v. 10ab: किं तावदत्र युक्तं स्याज्, ज्ञानमाकारवत्, कुतः।
7 कल्पना भवति ह्यल्पीयसीति ] *Ślokavārttika śūnya*, v. 18ab: अनेककल्पनायाश्च ज्यायसी ह्येककल्पना।
7 अर्थाकारपक्षे ··· °द्वैगुण्यम् ] *Ślokavārttika śūnya*, v. 11: तद् यद्याकारवानर्थो बाह्यः कल्प्येत, तस्य च। ग्राह्यत्वमन्यथा न स्यादिति ग्राहककल्पना॥

---

1 किं ] GMNSV$A_1B_1$ ; किं वा $C_1$ **2** यद्यर्थस्येति स्थास्यति ] GNSV$B_1C_1$ ; यद्यर्थस्येति M; यद्यर्थस्येति स्थास्यति स्थास्यति $A_1$ **2** जेष्यन्ति ] GMNSV$A_1$ $B_1$ ; विजेष्यन्ते $C_1$ **2** ज्ञानाकार° ] GMNSV$B_1C_1$ ; ज्ञानकार° $A_1$ **3** जेष्याम ] GMNSV$C_1$ ; जोष्याम $A_1B_1$ **5** °वदत्र युक्तम् ] GMNSV$A_1C_1$ ; °वदयुक्तं $B_1$ **7** भवति ह्य° ] GSV$A_1B_1$ ; तावदिहा° MN$C_1$ **7** °ल्पीयसीति ] GMN SV$A_1C_1$ ; °ल्पीयसेति $B_1$ **8** °योगात् तस्य ] GSV$A_1B_1C_1$ ; °योगाद् MN **9** °परिकल्प° ] GNSV$A_1B_1C_1$ ; °कल्प° M **9** °भाविनी° ] GMNSV$A_1B_1$ ; °भावनी° $C_1$

अथार्थ एव ग्राह्यात्मा यः स एव ग्राहक इति कथ्यते, स तर्हि प्रकाश एवेति संज्ञायामेव विवादः स्यात्। बाह्यान्तरकृतो विशेष इति चेत्। अहो विशेषज्ञो देवानांप्रियः। ग्राहकाद्विच्छिन्नता हि ग्राह्यस्य बाह्यता। न शरीरापेक्षिणी बाह्यता भवति। यदा च ग्राह्यादर्थाद् अव्यतिरिक्त एव ग्राहक इष्यते, तदाऽस्य न ततो विच्छिन्नतेत्यबाह्यत्वाज्ज्ञानमेव तदिति कथं न नाम्नि विवादः।

उभयसिद्धत्वाज्ज्ञानस्य तस्यायमाकारो भवितुमर्हति। ज्ञाने हि न केचन विवदन्ते। अतस्तस्यैवायमाकार इति युक्तम्। अनेककल्पनातो ह्येकार्थकल्पना ज्यायसीति।

## [3.2 प्रकाशकत्वात्]

अतश्च ज्ञानस्यायमाकारः। ज्ञानं हि प्रकाशकम् अप्रकाश-

1 अथार्थ ··· स्यात् ] *Ślokavārttika śūnya*, v. 13: तस्याकल्पनमिच्छंश्चेद् अर्थे ग्राहकतां वदेः। संज्ञामात्रे विसंवादः, सिद्धा त्वेकार्थकल्पना॥
2 बाह्यान्तरकृतो विशेष इति चेत् ] *Ślokavārttika śūnya*, v. 14cd: बाह्याभ्यन्तररूपश्च परिकल्पो मृषेष्यते॥
7 उभय॰ ··· ॰मर्हति ] *Ślokavārttika śūnya*, v. 19abc: तस्मादुभयसिद्धत्वाज्ज्ञानस्याकारकल्पना। ज्यायसी
9 अनेककल्पनातो ··· ज्यायसीति ] *Ślokavārttika śūnya*, v. 18ab: अनेककल्पनायाश्च ज्यायसी ह्येककल्पना।
11 ज्ञानं हि ··· ॰पगम्यते ] *Ślokavārttika śūnya*, v. 21: इतश्चाकारवज्ज्ञानं,

2 ॰ज्ञायामेव ] MN$A_1B_1$; ॰ज्ञायामेष GSV$C_1$ 2 बाह्यान्तर॰ ] GNSV$A_1B_1$; बाह्याभ्यन्तर॰ M; बाभ्यह्याभ्यन्तर॰ $C_1$ 3 विशेष इति चेत्। अहो विशेषज्ञो ] GMNSV$B_1C_1$; विशेषज्ञो $A_1$ (eyeskip) 4 ॰च्छिन्नता ] GMNSV$A_1C_1$; ॰च्छिन्नतया $B_1$ 4 ॰रापेक्षिणी ] GMNSV$A_1$; ॰रापेक्षणी $B_1$; ॰रोपेक्षणी $C_1$ 5 न ततो ] MN$B_1C_1$; ततो ऽ॰ GS; ततो V; ननौ $A_1$ 6 ॰ज्ज्ञानमेव ] GMNSV$A_1C_1$; ॰ज्ज्ञानमिव $B_1$ 6 कथं न ] GMSV$A_1B_1C_1$; कथं N 8 विवदन्ते ] GMNSV$B_1C_1$; विवंदते $A_1$ 9 अनेककल्पनातो ह्येकार्थकल्पना ] GMNSV$B_1C_1$; अनेककल्पना $A_1$ (eyeskip) 9 ज्यायसीति ] GMNSV$A_1C_1$; ज्यायसेति $B_1$ 11 ॰शकम् ] GMNSV$A_1B_1$; ॰शः $M^{ca}C_1$

स्यार्थस्य भवद्भिरभ्युपगम्यते। ततश्चार्थात्प्रथमतरम् अस्य ग्रहणेन भवितव्यम्, अगृहीतस्य दीपादेः प्रकाशस्य प्रकाशकत्वादर्शनात्।

उत्पन्नेष्वपि च घटादिष्वर्थेषु प्रकाशवैकल्याद्वा प्रतिबन्धवैधुर्याद्वा भवत्यग्रहणम्। ज्ञानस्य तूत्पन्नस्य सतो न कश्चिद् ग्रहणे प्रतिबन्धकः। न च प्रकाशान्तरापेक्षणम्, स्वत एव दीपवत्प्रकाशस्वभावत्वात्।

---

यस्मात् तद्वः प्रकाशकम्। स्वयंप्रकाशहीनस्य बाह्यस्योपायसंमतम्॥

2 अगृहीतस्य ··· °दर्शनात् ] *Ślokavārttika śūnya*, v. 22: न चागृहीते ज्ञानाख्ये प्रकाशे ऽर्थे ऽवधार्यते। तदधीनप्रकाशत्वाद्, दीपाभासे यथा घटः॥

3 उत्पन्नेष्वपि ··· °ग्रहणम् ] *Ślokavārttika śūnya*, v. 23: उत्पन्नेष्वपि चार्थेषु प्रकाशाभावतः क्वचित्। प्रतिबन्धकयोगाद्वा संवित्तिर्नोपजायते॥

4 ज्ञानस्य ··· प्रतिबन्धकः ] *Ślokavārttika śūnya*, v. 24ab: ज्ञानस्योत्पद्यमानस्य प्रतिबन्धो न कश्चन।

5 न च प्रकाशा° ··· °स्वभावत्वात् ] Cf. *Vākyapadīya jāti*, v. 106 (Rau): यथा ज्योतिः प्रकाशेन नान्येनाभिप्रकाश्यते। ज्ञानाकारस्तथाऽन्येन न ज्ञानेनोपगृह्यते॥

5 न च ··· °स्वभावत्वात् ] *Ślokavārttika śūnya*, v. 24cd: न चाप्रकाशरूपत्वं, येनास्याग्रहणं भवेत्॥

---

1 अप्रकाशस्या° ] GMNSV$A_1B_1$; अप्रकाशश्च $M^{ca}$; प्रकाशस्या° $C_1$ 1 °रभ्युपगम्यते ] GMNSV$A_1B_1$; °रवगम्यते $C_1$ 1 °तरम् अस्य ] MN$A_1B_1C_1$; °तरस्य GSV 1 ग्रहणेन ] GMNSV$A_1C_1$; ग्रहग्रेण $B_1$ 2 भवितव्यम् ] GMNSV$B_1C_1$; वितव्यम् $A_1$ 2 दीपादेः ] GMNSV$A_1^{pc}B_1C_1$; दीपादोः $A_1^{ac}$ 2 °कत्वाद° ] GMNSV$A_1C_1$; °कत्वात् द° $B_1$ 3 °ष्वर्थेषु ] GMNSV$A_1C_1$; °ष्वर्थे $B_1$ 3 प्रकाश° ] GMNSV$B_1C_1$; प्राकाश° $A_1$ 3 °वैकल्या° ] GMNSV$A_1C_1$; °वैशकल्या° $B_1$ 4 °धवैधुर्याद्वा ] GMSV; °धावैधुर्याद्वा N; °धवेधुर्याद्वा $A_1$; °धकेवेषुयाद्वा $B_1$; °धकवैधुर्याद्वा $C_1$ 4 °स्य तूत्पन्नस्य ] MN$B_1C_1$; °स्य उत्पन्नस्य GSV$A_1$ 4 कश्चिद् ] GNSV$A_1B_1C_1$; किंचिद् M 5 प्रतिबन्धकः ] GMNSV$A_1B_1$; प्रतिबन्धो $C_1$ 5 प्रकाशान्तरा° ] GNSV$A_1B_1C_1$; प्रकाशकान्तरा° M 6 °स्वभावत्वात् ] M$C_1$; °स्वभावात् GNSV$A_1$; °कस्वभावत्वात् $B_1$

अतो यदैव तस्योत्पादः, तदैव ग्रहणमवश्यं भवेत्। न चेत्, कालान्तरे ऽपि न स्यात्। किं हि तस्य कालान्तरे भविष्यति, किं वा तदा नाभूत्, येन तत् कालान्तरे ग्रहीष्यते, तदा च न गृह्यत इति।

ज्ञानान्तरेण कालान्तरे तद् ग्रहीष्यत इति चेत्। तदपि केन ग्रहीष्यते। अन्येनेति चेत्। तदप्यन्येनेति को ऽवधिः। श्रम इति चेत्। कामं श्रान्तो विरंस्यति भवान्, अर्थं तु न गृहीतवानेव, प्रकाशाग्रहणे तत्प्रकाश्यपरिच्छेदायोगात् – इत्येवं न कदाचिदर्थग्रहणं स्यात्। तस्मादर्थग्रहणवादिनाऽपि पूर्वं ज्ञानग्रहणम् अवश्याश्रयणीयम्। यथोक्तम् —

अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यति॥

---

**1** तदैव ··· न स्यात् ] *Ślokavārttika śūnya*, v. 25bcd: तदैव च। संवेदनं भवेदस्य, न चेत्, कालान्तरे ऽपि न॥
**2** किं हि ··· गृह्यत इति ] *Ślokavārttika śūnya*, v. 26: किं हि तस्य भवेदूर्ध्वं, प्राक् च नासीन्, न येन तत्। पूर्वं गृहीतं, पश्चाच्च गृहीतम् – इति भाष्यते॥
**5** ज्ञानान्तरेण ··· को ऽवधिः ] *Ślokavārttika śūnya*, v. 27: ज्ञानान्तरस्य चोत्पत्तिं प्रकाशो न प्रतीक्षते। तस्य तस्यापि चान्येन संवित्तावस्थितिर्भवेत्॥
**6** श्रम इति चेत् ] *Ślokavārttika śūnya*, v. 191a: यावच्छ्रमं
**8** प्रकाशाग्रहणे ··· °योगात् ] Cf. *Ślokavārttika śūnya*, v. 22ab: न चागृहीते ज्ञानाख्ये प्रकाशे ऽर्थो ऽवधार्यते।
**11** अप्रत्यक्षो° ··· प्रसिध्यति ] *Pramāṇaviniścaya* I 55cd (Vetter 1966:96)

---

**1** यदैव ] GMNSV$A_1B_1$; यदेव $C_1$ **1** ग्रहण° ] GMNSV$A_1B_1$; तत्ग्रहण° $C_1$ **1** भवेत् ] GMNSV$A_1B_1$; भवेदिति $C_1$ **3** च न ] GMNSV$A_1C_1$; न च $B_1$ **3** गृह्यत ] GMNSV$A_1C_1$; ग्रह्यते $B_1$ **5** तद् ग्रहीष्यत इति ] GMNSV$A_1B_1$; ग्रहीष्यत $C_1$ **6** अन्येनेति चेत् ] GMNSV$B_1C_1$; अन्येनोति चेत् $A_1$ **6** को ऽवधिः ] GMNSV$C_1$; को विधिः $A_1B_1$ **7** श्रान्तो ] GMNSV$B_1C_1$; श्राता $A_1$ **7** विरंस्यति ] GMNSV$A_1C_1$; विरस्यति $B_1$ **8** °शाग्रहणे ] GMNSV$B_1$; °शाग्रहण $A_1$; °शग्रहणे $C_1$ **8** तत्प्रकाश्य° ] GMNSV$A_1C_1$; °तत्प्रकाश° $B_1$ **9** °नाऽपि पूर्वं ] GMNSV$A_1B_1$; °नां $M^{ca}$; °ना पूर्वं $C_1$ **9** ज्ञानग्रहणम् ] GMNSV$B_1C_1$; ज्ञानं ग्रहणम् $A_1$

इति ।

## [3.3 प्रत्यवमर्शदर्शनात्]

अतश्चैतदेवम्, ज्ञानपृष्ठेनोत्तरकालमवमर्शदर्शनात्। “ज्ञातो मयाऽयमर्थः” इति हि प्रत्यवमृशन्तः प्रमातारः प्रथमं ज्ञानग्रहणमनुमोदन्ते। न ह्यगृहीतविशेषणा विशेष्यबुद्धिर्भवति। तस्मादपि पूर्वं ज्ञानग्रहणमिति सिद्धम्। ज्ञानं च ग्राह्यमाणम् आकाररहितं ग्रहीतुमशक्यमिति बलात् साकारमेव तद् ग्रहीतव्यम्। साकारे च ज्ञाने

---

**3** ज्ञानपृष्ठेनो° … दर्शनात्] *Pramāṇasamuccaya* I 11cd: स्मृतेरुत्तरकालं च न ह्यसावविभाविते॥ *Ślokavārttika śūnya*, v. 28: ज्ञानपृष्ठेन यो ऽप्यूर्ध्वमर्थाभावे ऽपि दृश्यते। परामर्शो ऽर्थरूपस्य, स कथं चोपपद्यते॥
**5** न ह्यगृहीत° … °र्भवति] *Nyāyamañjarī* II 277.5: विशेष्यबुद्धिमिच्छन्ति नागृहीतविशेषणाम्। *Tantravārttika* ad 3.4.13 (915.26): विशिष्टग्रहणं नेष्टमगृहीतविशेषणम्। *Tattvasaṅgraha* v. 947cd: विशेष्यबुद्धिरिष्टेह न चाज्ञातविशेषणा॥
**5** तस्मादपि … सिद्धम्] *Ślokavārttika śūnya*, v. 31ab: तस्मात् पूर्वगृहीतासु बुद्धिष्वर्थोपलम्भनम्।
**6** ज्ञानं … °शक्यमिति] *Ślokavārttika śūnya*, v. 31cd: न चोपलब्धिरस्तीह निराकारासु बुद्धिषु॥
**7** साकारे … °भावात्] *Ślokavārttika śūnya*, v. 32ab: विवेकबुद्ध्यभावाच्च, साकारस्य च दर्शनात्।

---

**1** इति] GMNSV$A_1B_1$; om. $C_1$ **3** ज्ञानपृष्ठेनो°] $C_1$; ज्ञानपृष्ठेन चो° GMNSV; ज्ञानह्यपृष्टेन चो° $A_1^{ac}$; ज्ञानपृष्टेन चो° $A_1^{pc}B_1$ **3** °कालमवमर्श°] GSV$B_1$; °कालभाविप्रत्यवमर्श° MN$C_1$; °काले वमर्श° $A_1$ **4** मयाऽयमर्थः] GMNSV$B_1^{pc}C_1$; ममायमत $A_1$; मयायमर्था $B_1^{ac}$ **4** हि] GMNSV$A_1B_1$; om. $C_1$ **4** °मृशन्तः] GMNS$C_1$; °मृश्यंतः $A_1$; °मृषन्तः V$B_1$ **4** प्रमातारः] GMNSV$A_1C_1$; प्रमातरः $B_1$ **5** ह्यगृहीत°] GMNSV$A_1C_1$; ह्यग्रह्यत° $B_1$ **5** विशेष्य°] GMNSV$A_1B_1$; विशेष्ये $C_1$ **5** पूर्वं] GMN$A_1B_1C_1$; पूर्व° SV **6** सिद्धम्] GMNSV$A_1B_1$; om. $C_1$ **6** ग्राह्यमाणम्] GSV$A_1B_1C_1$; गृह्यमाणम् MN **7** °मेव तद्] GMNSV$B_1C_1$; °मवद् $A_1$

गृहीते सति द्वितीयाकारग्रहणाभावात् कुतो ज्ञानातिरिक्तो बाह्यो ऽर्थः ।

## [3.4 प्रतिकर्मव्यवस्थानुपपत्तेः]

अतश्च साकारं ज्ञानम्, आकारवत्तामन्तरेणास्य प्रतिकर्मव्यवस्थानुपपत्तेः । कल्पयित्वाऽपि बाह्यमर्थम् अवश्यम् आकारवत्ता विज्ञानस्य विषयनियमसिद्धये वक्तव्या । नीलज्ञानं हीदम् अनेकसन्निधाने समुपजायमानं कथम् अखिलतदितरपदार्थपरिहारेण केवलनीलानुलग्नतामवलम्बेत । बोधस्वभावतायाः सर्वान् प्रत्यविशिष्टत्वात् । प्रवृत्तिरपि प्रेक्षापूर्वकारिणां कथं तदेकविषयैव स्यात् ।

न च नीलजनितत्वकृत एष तदधिगतिनियम इति कथयितुमुचितम्, आलोकलोचनादिकारकान्तरजनितत्वस्यापि भावे तद्विषयत्वप्रसङ्गात् । अतो नीलाकारतैव नीलविषयत्वव्यवस्थाहेतुः, न निमित्तान्तरम् । आह च —

---

**1** गृहीते ] GMNSV$A_1C_1$ ; ग्रहीते $B_1$ **1** द्वितीयाकारग्रहणा° ] $B_1C_1$ ; द्वितीयकारणा° GMNSV; द्वितीयाकारणा° $A_1$ **4** अतश्च ] GNSV$A_1B_1C_1$ ; इतश्च M **4** आकारवत्ताम° ] GMNSV$B_1C_1$ ; आकारवर्ताम° $A_1$ **4** प्रतिकर्म° ] GMNSV$A_1C_1$ ; प्रतिकर्त° $B_1$ **5** बाह्य° ] GMNSV$B_1C_1$ ; व्राह्य° $A_1$ **6** वक्तव्या ] GMNSV$C_1$ ; वक्तव्यं $A_1B_1$ **6** °ज्ञानं ] GMNSV$B_1C_1$ ; °ज्ञानां $A_1$ **8** °नीलानुलग्न° ] GSV$B_1$ ; °नीलालम्बन° MN$C_1$ ; °नीलानुलम्भ° $A_1$ **8** बोध° ] GMNSV$A_1B_1^{pc}C_1$ ; बोदध° $B_1^{ac}$ **8** सर्वान् ] GMNSV$B_1C_1$ ; सर्वोन् $A_1$ **8** प्रत्यविशि° ] GMNS$C_1$ ; प्रत्यवशि° V; प्रवशि° $A_1$ ; प्रति वसि° $B_1$ **9** °विषयैव ] GMNSV$A_1B_1$ ; °विषयं $C_1$ **10** °जनितत्वकृत ] MN$A_1$ ; °जनितत्वेनार्थत GSV; °जनेत्यत्वकृत $B_1^{ac}$ ; °जनित्यत्वकृत $B_1^{pc}$ ; °जनिततत्वकृत $C_1$ **10** तदधिगति° ] GNSV; तदधिगम° M$C_1$ ; तदधिगत° $A_1B_1$ **11** °मुचित° ] GMNSV$A_1C_1$ ; °मुदित° $B_1$ **11** °लोचनादि° ] GMNSV$B_1C_1$ ; °चनादि° $A_1$ **11** °तत्वस्यापि ] GMNSV$A_1C_1$ ; °त्वस्यापि $B_1$ **11** भावे त° ] GSV$A_1B_1C_1$ ; भावेन त° MN **12** अतो ] MNSV$A_1B_1C_1$ ; om. G

तत्रानुभवमात्रेण ज्ञानस्य सदृशात्मनः ।
भाव्यं तेनात्मना, येन प्रतिकर्म विभज्यते ॥

इति ।

अत एवाकारग्रहणमेवातिशयमाश्रित्य तमबर्थसमर्थने सति साधकतमं ज्ञानमेव प्रमाणं भविष्यति, अपरथा कारकातिशयदर्शनाभावे तत्साधकतमत्वस्य दुरुपपादत्वात् ।

साकारज्ञानसाक्षी च लौकिको ऽपि दृश्यते व्यवहारः । एवं च वक्तारो भवन्ति लौकिकाः "नीलो ऽर्थो ऽयम्, यतो ऽत्र तदाकारं ज्ञानमुत्पन्नम्" इति । तेन प्रतिकर्मनियमान्यथानुपपत्तेरवश्यं साकारमेव ज्ञानम् ।

इत्थं सत्यपि बाह्ये ऽर्थे ज्ञानस्याकारकल्पना ।
भवेदेवेति तत्रैव सन्तुष्य स्थीयतां वरम् ॥

---

1 तत्रा° ··· विभज्यते ॥ *Pramāṇavārttika* III 302
8 एवं ··· इति ] *Ślokavārttika śūnya*, v. 30: वक्तारश्चापि दृश्यन्ते वर्तमानार्थबुद्धिषु । "नीलो ऽर्थो ऽयं, यतो मे ऽत्र तद्रूपा जायते मतिः" ॥

---

**2** भाव्यं तेनात्मना ] GNSV$C_1$; भाव्यते ऽनात्मना M; भाव्य तेनात्मना $A_1$; भावि तेनात्मना $B_1$ **3** इति ] M$C_1$; om. GNSV$A_1B_1$ **4** अत ] MN$C_1$; तत GSV; गत $A_1$; अता $B_1$ **4** °समर्थने ] GMNSV$A_1C_1$; °समर्थनो $B_1$ **5** साधकतमं ] GMNSV$C_1$; साधकमं $A_1$; साधकतम° $B_1$ **5** भविष्यति, अपरथा ] GMNSV$B_1C_1$; भविष्यन्नपरथा $A_1$ **6** तत्साधक° ] $A_1B_1$; तत्तत्साधक° GMNSV; साधक° $C_1$ **7** लौकिको ] GMNSV$A_1C_1$; लोकिको $B_1$ **8** ऽर्थो ] GMNSV$A_1B_1C_1$; ऽर्थौ $S^2$ **9** तदा° ] GMNSV$A_1B_1$; नीला° $M^{ga}$; नीलतदा° $C_1$ **9** °मुत्पन्नम् ] GMNSV$A_1^{pc}B_1C_1$; °मुपत्पन्नम् $A_1^{ac}$ **9** °मान्यथा° ] GMNSV$C_1$; °मानियथा° $A_1$; °मान्यथान्य° $B_1$ **10** °त्तेरवश्यं साकारमेव ] GMNSV$B_1$; °त्तेरवश्यमाकारमेव $A_1$; °त्तेः साकारन् $C_1$ **10** ज्ञानम् ] GMNSV$A_1B_1$; ज्ञानमितिमिति $C_1^{ac}$; ज्ञानमिति $C_1^{pc}$ **11** बाह्ये ऽर्थे ] M$C_1$; बाह्यार्थे GNSV; वाह्यर्थे $A_1$; बाह्यो र्थे $B_1$ **12** भवेदेवेति ] GMNSV$B_1C_1$; भवेद्वेति $A_1$ **12** सन्तुष्य ] MN$C_1$; सन्तोष्य GSV$A_1$; संतोष $B_1$

## [3.5 सौत्रान्तिकमतनिरासः]

ये तु — ज्ञानस्य स्वतःस्वच्छस्वभावत्वेन नीलपीताद्यवभासः परोपाधिरेव भवितुमर्हति, स्फटिकस्येव लाक्षादिनाऽरुणिमाद्यनुवेधः। अतः पृथगननुभूयमानो ऽपि बाह्यो ऽर्थः साकारज्ञानावभासान्यथानुपपत्त्याऽनुमीयते। यथोक्तम् —

बाह्यसिद्धिः स्याद्व्यतिरेकतः॥

इति।

तदिदम् अनुपपन्नम्, अन्वयानुपलब्धेः।

अर्थे हि सति साकारं निराकारं तदत्यये।
नित्यानुमेयबाह्यार्थवादी ज्ञानं क्क दृष्टवान्॥

लाक्षास्फटिकादौ तु तथा युक्तम्, तदनुरक्तस्फटिकशकलावलोकनात्। इह पुनः

अर्थेन रज्यमानं हि निराकारं निसर्गतः।

---

**6** बाह्यसिद्धिः स्याद्व्यतिरेकतः ] *Pramāṇaviniścaya* I 59d (Vetter 1966:100)
**9** अर्थे हि सति ··· दृष्टवान्॥ =*Nyāyamañjarī* I 41.14–15
**13** अर्थेन ··· पश्यामो ] *Ślokavārttika śūnya* v. 33: न ह्येवं कल्पना शक्या

---

**2** ये तु ] GSV$A_1B_1$ ; ये तु ब्रुवन्ते MN; ये तु ब्रुवते $C_1$ **3** स्फटिकस्येव ] GMNSV$B_1$ ; स्फटिकस्यैव $A_1$ ; स्फाटिकस्यैव $C_1$ **4** °गननुभूयमानो ] GMNSV$B_1C_1$ ; °गनुभूयमानो $A_1$ **4** साकार° ] GMNSV$A_1C_1$ ; सकार° $B_1$ **5** °नावभासा° ] GMNSV$B_1C_1$ ; °नाभासा° $A_1$ **5** °नुपपत्त्याऽनुमीयते ] GMNSV$C_1$ ; °नु×भवितुमर्हति×पपत्त्या मीयते $A_1$ ; °नुपपत्त्यानुनुमीयते $B_1$ **6** °तिरेकतः ] GMNSV$A_1C_1$ ; °तिरेकत्र $B_1$ **8** अन्वया° ] GMNSV$A_1C_1$ ; अनुभूया° $B_1$ **9** अर्थे ] GMNS$C_1$ ; आर्थो $A_1^{ac}$ ; अर्थो V$A_1^{pc}B_1$ **9** हि सति ] MN$B_1C_1$ ; ज्ञानं हि GSV; हि $A_1$ **9** साकारं ] GMNSV$A_1C_1$ ; कारं $B_1$ **10** क्क दृष्टत्वान् ] GMNSV$A_1C_1$ ; om. $B_1$ **11** °स्फटिकादौ ] GMNSV$B_1C_1$ ; °स्फाटिकादौ $A_1$ **11** °कशकलाव° ] M$C_1$ ; °कव° $A_1$ ; °काव° GNSV$B_1$ **12** °लोकनात् ] GMNSV$A_1C_1$ ; °लोचनात् $B_1$ **13** रज्यमानं ] GMNSV$C_1$ ; राज्यमानं $A_1B_1$ **13** निराकारं ] GMNSV$B_1C_1$ ; राकारं $A_1$ **13** निसर्गतः ] GMNSV$A_1B_1C_1$ ; तदत्यये $S^2$

ज्ञानं न खलु पश्यामो, लाक्षया स्फटिकं यथा॥

आकारद्वयप्रतिभासो हि नास्तीत्युक्तम्। अभ्युपगमे वा दुरुत्तरम् अनवस्थादूषणम्। अर्थाकारश्च प्रत्यक्षः, तत्कृतश्च ज्ञानाकारः प्रत्यक्ष इत्युच्यमाने ऽर्थाकारस्तावत् साकारेण ज्ञानेन गृहीतः। स इदानीं ज्ञानाकारो ऽपि ग्राह्यत्वात् साकार ज्ञानान्तरग्राह्य एव स्यादित्यनिष्ठा। अथ स्वप्रकाशं तत् साकारं ज्ञानमिष्यते, तेन ज्ञानान्तरानपेक्षणान्नानवस्थेति। तर्हि स्वप्रकाशसाकारज्ञानव्यतिरिक्तार्थाकारानवभासात् तदेवास्तु। कुतो द्वितीय इदानीमर्थाकारः।

न चान्यथानुपपत्त्याऽपि तत्कल्पना युक्तिमती। न हि राजशासनमिदम् “अर्थेनाकारवता भवितव्यम्” इति। ज्ञानमेव नीलाद्याकारं यदि भवेत्, को दोषः स्यादिति। नीलाद्याकारयोगाद् अर्थः

---

निराकारादितो मतिः। गृह्यते, ऽर्थस्ततः पश्चात् साकारः संप्रतीयते॥
**10** न हि ⋯ इति ] Cf. *Ślokavārttika śūnya*, v. 219cd: एकाकारं भवेदेकम् इति नेश्वरभाषितम्॥

---

**1** लाक्षया ] GMNSVC$_1$; लाया A$_1$; लाक्षाया B$_1$ **2** °प्रतिभासो ] MNB$_1$C$_1$; °प्रतीतिर् GSV; °प्रति A$_1$ **2** °त्युक्तम्। अभ्यु° ] GMNSVA$_1$B$_1$C$_1$; °तीत्यभ्यु° S$^2$ **2** दुरुत्तरम् ] GNSVA$_1$C$_1$; सुदुस्तरम् M; दुरुत्तमेरम् B$_1$ **3** अर्था° ] GMNSVA$_1$C$_1$; आर्था° B$_1$ **3** प्रत्यक्षः ] GMNSVA$_1$C$_1$; प्रत्यक्षा B$_1$ **4** साकारेण ] GMNSVB$_1$C$_1$; सकारे A$_1$ **5** ज्ञानाकारो ] GMNSVA$_1$C$_1$; ज्ञानकारो B$_1$ **5** °ज्ञानान्तरग्राह्य एव ] GSV; °ज्ञानान्तरं भवेत्। तदपि साकारं ज्ञानान्तरं तथाभूतज्ञानान्तरग्राह्यमेव MNC$_1$; °ज्ञानांतरग्राह्यमेव A$_1$B$_1$ **6** °निष्ठा ] C$_1$; °निष्टम् GMNSV; °निष्टा A$_1$B$_1$ **6** स्वप्रकाशं ] GMNSVA$_1$C$_1$; स्वप्रकाश B$_1$ **6** साकारं ] GMNSVA$_1$C$_1$; साकार° B$_1$ **7** °रानपेक्ष° ] GMNC$_1$; °रापेक्ष° SVA$_1$B$_1$ **7** °नवस्थेति ] GMNSVC$_1$; °वस्थेति A$_1$; °नावस्थेति B$_1$ **7** °शसाकार° ] GMNSVC$_1$; °शासार° A$_1$; °शस्वाकार° B$_1$ **8** इदानीम° ] GMNSVB$_1$C$_1$; दानीम° A$_1$ **8** °र्थाकारः ] GMNSVB$_1$C$_1$; °र्थाकारः प्रत्यक्ष इत्युच्यमाने र्थाकारस्तावत्सकारे ज्ञानेन गृहीतः स इदानीं ज्ञानाकारो पि ग्राह्यत्वात्साकारज्ञानांतरग्राह्यमेव स्यादित्यनिष्टा अथ स्वप्रकाशं तत्साकारानवभासात्तदेवास्तु कुतो द्वितीय इदानीमर्थाकारं क्क A$_1$ **10** ज्ञानमेव ] GMNSVA$_1$C$_1$; ज्ञानमिव B$_1$ **11** °रं यदि ] GMNSVA$_1$C$_1$; °रं इति B$_1$

स इति चेत्। संज्ञायां विवाद इत्युक्तम्, द्वितीयस्याभावात्।

स्वच्छत्वाज् ज्ञानस्य कालुष्यम् अन्यकृतमिति चेत्। अविद्यावासनाकृतं तद् भविष्यति। स्वतः स्वच्छमपि ज्ञानम् अनाद्यविद्यावासनाविभवोपनतमनेकाकारकालुष्यरूषितवपुरिव प्रकाशते। ज्ञानवासनाभेदसन्तानयोश्च बीजाङ्कुरवद् अनादित्वान्नात्र पर्यनुयोगस्यावसरः "कुतो वासना प्रवृत्ता" इति।

तस्माद् अनादिवासनावैचित्र्यरचितज्ञानवैचित्र्योपपत्तेः कृतम् अनुमेयेनापि बाह्येनार्थेनेति ज्ञानस्यैवायमाकार इति सिद्धम्।

## [3.6 सहोपलम्भनियमः]

अतश्च ज्ञानस्यैवायमाकारः। ज्ञानेन विना हि न क्वचिद् अर्थरू-

---

**3 स्वतः** ··· **प्रकाशते** ] *Ślokavārttika śūnya*, v. 15–17ab: मत्पक्षे यद्यपि स्वच्छो ज्ञानात्मा परमार्थतः। तथाऽप्यनादौ संसारे पूर्वज्ञानप्रसूतिभिः॥ चित्राभिश्चित्रहेतुत्वाद् वासनाभिरुपप्लवात्। स्वानुरूप्येण नीलादिग्राह्यग्राहकरूषितम्॥ प्रविभक्तमिवोत्पन्नं नान्यमर्थमपेक्षते।
**5 ज्ञान°** ··· **अनादित्वान्** ] *Ślokavārttika śūnya* v. 17cd: अन्योन्यहेतुता चेयं ज्ञानशक्त्योरनादिका॥
**10 ज्ञानेन** ··· **°गच्छामः** ] *Ślokavārttika śūnya*, v. 53: अन्वयव्यतिरेकाभ्यामेवं

---

**1 इति** ] GNSV$A_1B_1C_1$; भवेदिति M **1 संज्ञायां** ] GMNSV$A_1C_1$; संज्ञाया $B_1$ **1 द्वितीयस्या°** ] GMNSV$B_1C_1$; द्वितीयास्या° $A_1$ **2 कालुष्यम् अन्यकृतमिति** ] GNSV$A_1B_1$; काल्ष्य्यम् अन्यकृतं युक्तमिति M; मन्यकृतं युक्तमिति $C_1$ **3 °वासनाकृतं** ] GMNSV$B_1$; °वासनात्कृतं $A_1$; °वासाकृतं $C_1$ **3 स्वतः** ] GMNSV$B_1C_1$; स्वतः स्वतः $A_1$ **4 °द्यविद्यावासना°** ] GMNSV$B_1C_1$; °द्यवासना° $A_1$ **4 °विभवोपनतम°** ] M; °विभवेन तत्तद° GSV; °विभवेनोपनता° N; °विभवोतनसद° $A_1$; °विभवोवनमद° $B_1$; °विभवोपगम° $C_1$ **4 °रूषित°** ] GMNSV$A_1C_1$; °भूषित° $B_1$ **5 °न्नात्र** ] MN$C_1$; °न्नास्य GSV$A_1B_1$ **8 कृतम् अनुमेयेनापि** ] GMNSV$C_1$; कृतमानुमेयनापि $A_1$; कृतमनुमयेनापि $B_1$ **8 ज्ञानस्यैवायमाकार** ] GMNS$C_1$; ज्ञानस्यायमेवाकार V $A_1B_1$ **10 अतश्च ज्ञान°** ··· **ज्ञानं त्वर्थर°** ] MN$C_1$; अतश्च ज्ञानमर्था° $S^2$; अतश्च ज्ञानमर्थर° GSV(eyeskip); अतश्च ज्ञानमर्थे र° $A_1B_1$(eyeskip)

पमुपलभ्यते, ज्ञानं त्वर्थरहितमपि गन्धर्वनगरमायादिषु विस्पष्टमुपलभ्यते — इत्यन्वयव्यतिरेकाभ्यामपि ज्ञानाकारत्वमवगच्छामः। यदि च ज्ञानादर्थः पृथगवस्थितात्मा भवेत्, ज्ञानमन्तरेणाप्यसावुपलभ्येत, न चैवमस्ति। तस्मादभेद एव ज्ञानार्थयोः। यथाह —

सहोपलम्भनियमादभेदो नीलतद्धियोः॥

इति।

## [3.7 संसर्गधर्मभूताकारनिरासः]

न च ज्ञानार्थसंसर्गधर्म आकारो भवितुमर्हति। यदि हि पृथगर्थमनाकारं पृथक् च ज्ञानमनाकारम् उपलभ्य संसृष्टयोर्ज्ञानार्थयोराकारवत्ताम् उपलभेमहि, तत इममाकारं संसर्गधर्मं प्रतिपद्येमहि।

---

ज्ञानस्य गम्यते। आकारो, न हि बाह्यस्य ज्ञानापेतो निदर्श्यते॥

**5** सहोपलम्भ° ··· °तद्धियोः॥ *Pramāṇaviniścaya* I 55ab

**8** न च ··· °मर्हति ] *Ślokavārttika śūnya*, v. 42: संसर्गधर्म आकारस्तस्मादेव न युज्यते। देशभेदादसंसर्गो, मूर्तामूर्ततया तथा॥

**8** यदि हि ··· प्रतिपद्येमहि ] *Ślokavārttika śūnya*, v. 47: द्वयोराकारनिर्मुक्तं सत्त्वं संसृष्टतां तथा। स्वरूपतः परिच्छिद्य वक्तुमित्यादि युज्यते॥

---

**2** °त्वमवगच्छामः ] GMNSVB$_1$; °त्वमवछामः A$_1$; °त्वेमवगच्छामः C$_1$ **3** ज्ञानमन्तरेणाप्यसा° ] MN; ज्ञानांतरेणप्यसा° A$_1$; ज्ञानान्तरेणाप्यसा° GSVB$_1$; ज्ञानमन्तरेणाप्यस° C$_1$ **4** °लभ्येत ] GMNSVC$_1$; °लभ्यते A$_1$B$_1$ **4** यथाह ] B$_1$C$_1$; यदाह M; तथाह GNSV; यथा A$_1$ **5** सहोपलम्भ° ] GMNSV; सहोपलेभ° A$_1$; सहोपलंब° B$_1$; सहोपलंभा° C$_1$ **5** °दभेदो ] GMNSVA$_1$C$_1$; °दवेदो B$_1$ **5** °तद्धियोः ] GMNSVB$_1$C$_1$; °पद्धियोर् A$_1$ **8** °संसर्ग° ] GMNSVA$_1$B$_1$; °संसंसर्ग° C$_1$ **9** °मनाकारं ] GMNSVC$_1$; °मनाकारे A$_1$; °मनाकार B$_1$ **9** संसृष्ट° ] GMNSVA$_1$C$_1$; संस्पष्ट° B$_1$ **9** °योर्ज्ञानार्थ° ] GNSVA$_1$B$_1$C$_1$; °योर्ज्ञान° M **10** °कारवत्ताम् ] GMNSVC$_1$; °कारत्ताम् A$_1$; °कारवृत्ताम् B$_1$ **10** °लभेमहि ] GMNSVA$_1$C$_1$; °लभ्येमहि B$_1$ **10** इममाकारं ] GMNSVB$_1$C$_1$; इममाकार A$_1$ **10** संसर्ग° ] GMNSVB$_1$C$_1$; संसग° A$_1$ **10** °धर्मं ] GMNSVA$_1$C$_1$; °धर्म B$_1$ **10** प्रतिपद्येमहि ] GMNSVA$_1$B$_1^{pc}$C$_1$; प्रतिपद्येतमहि B$_1^{ac}$

न त्वयमस्ति क्रमः। अर्थरहितत्वे ऽपि च स्मरणस्वप्नादिज्ञानानाम् आकारवत्त्वम् अस्तीत्युक्तम्। अतः कथं संसर्गधर्म आकारः।

[3.8 विरुद्धधर्मसमावेशात्]

अपि च "नक्षत्रम्" "तारका" "तिष्यः" इति कथम् एकस्मिन्नर्थे परस्परविरुद्धलिङ्गसमावेशः। परिव्राजककामुककौलेयकानां च कथमेक एव वनितारूपो ऽर्थः "कुणपः" इति "कामिनी" इति "भक्ष्यम्" इति च प्रतिभासत्रितयविषयताम् अनुभवेत्। "दाराः" इति कथमेकैव स्त्रीव्यक्तिः पुंवचनबहुवचनविषयतां यायात्। "ष-

---

4 अपि च ··· °समावेशः ] Cf. *Ślokavārttika śūnya*, v. 58: नक्षत्रं तारका तिष्यो दारा इत्येवमादिषु। नैकत्रार्थे विरुद्धत्वाल् लिङ्गानेकत्वसंभवः॥

5 परिव्राजक° ··· अनुभवेत् ] *Ślokavārttika śūnya*, v. 59ab: परिव्राट्कामुकशुनां कुणपादिमतिस्तथा। *Pramāṇavārttikasvavṛtti* 32.6–7: यथा रूपदर्शनाविशेषे ऽपि कुणपकामिनीभक्ष्यविकल्पाः। *Nyāyamañjarī* II 142.6–8: यथावस्थिते वनितात्मनि बाह्ये ऽर्थे वासनानुसारेण कुणप इति कामिनीति भक्ष्यमिति प्रतिभा भवन्ति। *Sarvadarśanasaṅgraha* II, 30.1–2 (Abhyankar ed.): परिव्राट्कामुकशुनामेकस्यां प्रमदात्मनौ। कुणपः कामिनी भक्ष्य इति तिस्रो विकल्पनाः॥

8 "दाराः" इति ··· च भवेत् ] *Pramāṇavārttikasvavṛtti* 36.18–22: दाराः षण्णगरीत्यादौ भेदाभेदव्यवस्थितेः। खस्य स्वभावः खत्वं चेत्यत्र वा किंनिबन्धनम्॥ ६७॥ यदैकापि स्त्री "दाराः", एकमपि सिकताद्रव्यं "सिकताः" इति व्यवहारः, तत्र किं बाहुल्यं येनैवं भवति।

---

1 न त्वयमस्ति ] GMNSV$A_1C_1$; न त्वयमुपलभ्येमहि। न त्वयमस्ति $B_1$ 1 अर्थरहितत्वे ] GMNSV$B_1C_1$; अर्थारहितत्वे $A_1$ 2 आकारवत्त्वम् ] GMNSV$B_1C_1$; आकारत्त्वम् $A_1$ 2 °त्युक्तम् ] GMNSV$A_1C_1$; °त्युक्त $B_1$ 4 नक्षत्रम् ] GMNSV$B_1C_1$; नक्षत्र $A_1$ 4 इति कथम् एक° ··· "दाराः" ] GMNSV$A_1B_1$; om. $C_1$(eyeskip) 5 °व्राजक° ] GMNSV$B_1$; °व्राजका° $A_1$ 6 °मेक एव ] GMNSV$A_1$; °मेकै एव $B_1$ 6 °रूपो ] GMNSV$A_1$; °रूरूपो $B_1$ 6 ऽर्थः ] GMNSV$A_1$; र्थ $B_1$ 6 कुणपः ] GMNSV$A_1$; कोणप $B_1$ 7 भक्ष्यम् ] M; भक्ष्य GNSV$A_1B_1$ 8 कथमेकैव ] GMNSV$C_1$; कथमेकव $A_1$; कथमेकव $B_1$(marked) 8 °व्यक्तिः पुंवचन° ] GMNSV; °व्यक्ति पुंवचन° $A_1B_1$; °व्यक्तिर् $C_1$

ण्णगरी” इति च कथं बहूनामन्यलिङ्गानाम् एकता स्त्रीलिङ्गता च भवेत्। ह्रस्वदीर्घयोश्च कथं परस्परापेक्षग्रहणयोरर्थ एकतर आकारः पारमार्थिकः स्यात्।

ज्ञानानां तु भिन्नत्वाद् विचित्रवासनाभेदसहकारिरूपानुविधानेन जायमानानां न कश्चिदपि विरोधः। तस्माज्ज्ञानमेवेदं सर्वत्र तथा तथा प्रतिभाति, न तद्व्यतिरिक्तो ऽर्थो नाम कश्चिद् इति। ज्ञान एव चैकत्रायं प्रमाणप्रमेयप्रमितिव्यवहारः परिसमाप्यते। तस्य हि विषयाकारता प्रमेयम्, ग्राहकाकारता प्रमाणम्, स्वसंवित्तिश्च फलम् इति। यथोक्तम् —

यदाभासं प्रमेयं तत्प्रमाणफलते पुनः।
ग्राहकाकारसंवित्त्योस्, त्रयं नातः पृथक् कृतम्॥

इति। तदिदम् अनाद्यविद्यावासनाविलासविपर्यासिततत्त्वदर्शनत-

---

**3** ह्रस्व॰ ··· ॰पेक्षग्रहण॰ ] *Ślokavārttika śūnya*, v. 59cd: दीर्घह्रस्वत्वबुद्धिश्च ह्येकस्मिन्नप्यपेक्षया॥
**10** यदाभासं ··· कृतम्॥ *Pramāṇasamuccaya* I 10

---

**2** कथं ] GMNSV$A_1B_1$; om. $C_1$ **2** परस्परापेक्ष॰ ] GMSV$B_1C_1$; परस्परसापेक्ष॰ N; पराप्रेक्ष॰ $A_1$ **2** ॰योरर्थ एकतर ] em.; ॰योरर्थैनैकतर GMNSV$A_1B_1$; ॰योरर्थैकतर $C_1$ **2** आकारः ] GMNSV$A_1C_1$; आकार $B_1$ **4** भिन्नत्वाद् ] GMNSV$B_1C_1$; भिन्नवाद् $A_1$ **4** ॰भेदसहकारि॰ ] GMNSV$B_1C_1$; ॰भेवदसंहकारि॰ $A_1$ **5** जायमानानां ] GMNSV$B_1C_1$; जायमानाना $A_1$ **5** कश्चिदपि ] GNSV$A_1B_1C_1$; किंचिदपि M **6** तद्व्यतिरिक्तो ] GMNSV$A_1C_1$; तद्धितिरिक्तो $B_1$ **6** कश्चिद् ] GNSV$A_1B_1C_1$; किंचित् M **7** ॰व चै॰ ] GMNSV$A_1B_1$; ॰वै॰ $M^{ca}C_1$ **7** ॰त्रायं ] GMNSV$B_1C_1$; ॰त्रायां $A_1$ **8** ग्राहकाकारता ] GMNSV$A_1C_1$; ग्राहकाकारताकारता $B_1$ **8** स्वसंवित्तिश्च ··· तत्प्रमाण॰ ] GMNSV$A_1C_1$; om. $B_1$(eyeskip) **10** तत्प्र॰ ] GMNSV$A_1C_1$; यत्प्र॰ $S^2$ **11** ग्राहकाकारसंवित्त्योस् ] GMNSV$C_1$; ग्राहकारसंवित्त्यांस् $A_1$; ग्राहकाकारसवित्त्योस् $B_1$ **12** अनाद्यविद्या॰ ] GMNSV$A_1C_1$; अनादिविद्या॰ $B_1$ **12** ॰विलास॰ ] GMNSV$B_1C_1$; ॰विलासनाविलास॰ $A_1$

या ज्ञानमेव ग्राह्यग्राहकसंवित्तिभेदवदिव लक्ष्यते। अविद्याविरतौ तु स्वच्छमेव तत् संपद्यते, न किंचिद्वेति

तदुक्तम् —

नान्यो ऽनुभाव्यो बुद्ध्याऽस्ति, तस्या नानुभवो ऽपरः।
ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते॥
अविभागो ऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते॥

### [3.9 पूर्वपक्षोपसंहारः]

इत्यर्थरूपरहितं संविन्मात्रं किलेदमिति पश्यन्।
परिहृत्य दुःखसन्ततिम् अभयं निर्वाणमाप्नोति॥

---

**1 अविद्या॰ ··· किंचिद्वेति** ] Cf. *Nyāyamañjarī* II 439.4–5: निर्वाणादिपदाख्येयमपवर्गं तु सौगताः। सन्तत्युच्छेदमिच्छन्ति स्वच्छां वा ज्ञानसन्ततिम्॥
**4 नान्यो ··· प्रकाशते॥** *Pramāṇaviniścaya* I 38
**6 अविभागो ··· लक्ष्यते॥** *Pramāṇaviniścaya* I 45 (=*Pramāṇavārttika* III 354)

---

**1 ॰दर्शनतया ज्ञानमेव** ] GMNSV$B_1C_1$; ॰दर्शनमेव $A_1$ **1 ॰भेदवदिव** ] GMNSV$A_1C_1$; ॰भेदावदिव $B_1$ **1 ॰विरतौ** ] GMNSV$A_1C_1$; ॰विरतो $B_1$ **2 स्वच्छमेव** ] GMNSV$A_1C_1$; ॰च्छमेव $B_1$ **2 तत् संपद्यते** ] GMNSV$A_1C_1$; उत्पद्यते $B_1$ **2 किंचिद्वेति** ] GMNSV$B_1C_1$; किंचि $A_1$ **4 ऽनुभाव्यो** ] GMNSV$C_1$; नभावो $A_1$; नुभावो $B_1$ **5 स्वयं सैव** ] MN$B_1C_1$; स्वयमेव GSV$A_1$ **5 प्रकाशते** ] GMNSV$A_1C_1$; प्रकाश्यते $B_1$ **6 अविभागो** ] GNSV$A_1B_1$; तथा अविभागो M$C_1$ **7 ॰वानिव** ] GMNSV$A_1B_1$; ॰वानिल $C_1$ **9 इत्यर्थ॰** ] GMNSV$A_1C_1$; इत्यर्थः $B_1$ **9 संवि॰** ] GMNSV$B_1C_1$; सवि॰ $A_1$ **10 ॰सन्त॰** ] MN$A_1B_1C_1$; ॰संसृ॰ GS; ॰संस॰ V

## [4 सिद्धान्तः]

अत्राभिधीयते।

### [4.1 न ग्राह्यग्राहकयोरभेदः]

#### [4.1.1 विरुद्धधर्मद्वयसमावेशानुपपत्तेः]

न खल्वेक एव बोधात्मा ग्राह्यग्राहकोभयस्वभावो भवितुमर्हति, ग्राह्यग्राहकरूपयोरितरेतरविसदृशत्वेनैकत्र समावेशानुपपत्तेः। तथा हि नीलज्ञानं पीतज्ञानं शुक्लज्ञानमिति नीलपीताद्युपजनापाये ऽप्यनुवर्तमानबोधरूपता नीलादिविलक्षणाऽन्वयव्यतिरेकाभ्यामवधार्यते।

#### [4.1.2 बौद्धैरपि भेदस्याभ्युपगतत्वात्]

अपि च ज्ञानम् अहंकारास्पदम् आनन्दादिस्वभावं स्वकर्मणि च सव्यापारमिव भवद्भिरभ्युपगतम्। अर्थस्तु नैवमात्मक इति कथम-

---

**12** स्वकर्मणि ··· °पगतम्] *Pramāṇaviniścaya* I 37 (=*Pramāṇavārttika* III 308): सव्यापारमिवाभाति व्यापारेण स्वकर्मणि। तद्वशात् तद्व्यवस्थानाद् अकारकमपि स्वयम्॥ (ab quoted in *Nyāyamañjarī* I 40.12)

---

**5** ग्राह्यग्राहकोभयस्वभावो ] GNSV; ग्राह्यग्राहकतयोभयस्वभावो M; ग्राहकोभयस्वभावो $A_1$; ग्राह्यग्राहकोभवस्वभावो $B_1$; ग्राह्यग्राहकयोभयस्वभावो $C_1$ **6** °पपत्तेः ] GMNSV$B_1C_1$; °पपत्ते $A_1$ **7** नीलज्ञानं ] GMNSV$B_1C_1$; नीलज्ञान $A_1$ **7** पीतज्ञानं ] GMNSV$B_1$; पीतज्ञान $A_1C_1$ **7** शुक्लज्ञान° ] GMNSV$A_1B_1$; om. $C_1$ **7** नीलपीताद्यु° ] GMNSV$B_1C_1$; नीलपीद्यु° $A_1$ **8** °जनापाये ] GSV$B_1C_1$; °जननापाये MN$A_1$ **8** °रूपता ] GSV$A_1C_1$; °रूपतया M; °रूपतया ज्ञानं N; °ता $B_1$ **8** °दिविलक्षणाऽ° ] G$M^{gha}$SV$C_1$; °दिविलक्षणम् अ° MN; °दिलक्षणा° $A_1$; °द्यविलक्षणा° $B_1$ **11** °कारास्पदम् ] GMNSV$B_1C_1$; °कास्पदम् $A_1$ **11** आनन्दा° ] GMNSV$A_1C_1$; अनत्या° $B_1$ **11** °स्वभावं ] GMNSV$C_1$; °स्वभाव $A_1B_1$ **12** स्वकर्मणि च सव्यापारमिव ] GMNSV$A_1B_1$; स्वारमिव $C_1$ **12** अर्थस्तु ] GMNSV$B_1C_1$; अर्थस्त $A_1$

नयोरभेदः। यद्यपि "ज्ञानमिदम्" "अयमर्थः" इत्येवमाकारद्वयप्रतिभासो नास्ति, तथाऽप्ययम् एको ऽप्याकारः प्रतिभासमानः प्रकाश्य एव प्रतिभाति, न प्रकाशकः। "इदं नीलम्" इति ग्राहकाद्विच्छिन्न एव ग्राह्याकारो ऽवभासते, न तु "अहं नीलम्" इति तदैक्येनावभासो ऽस्तीति।

### [4.1.3 अर्थज्ञानयोर्ग्रहणप्रकारभेदः]

अपि च प्रकाश्यस्य नीलादेः प्रकाशकबोधाधीनं युक्तं नाम ग्रहणम्। बोधस्य तु तद्ग्राहकस्य तदा किंकृतं ग्रहणमिति चिन्त्यम्। न बोधान्तरनिबन्धनम्, अनवस्थाप्रसङ्गात्। नापि स्वप्रकाशं ज्ञानम्, "अहं नीलम्" इत्यप्रतिभासात्।

#### [4.1.3.1 ज्ञानस्य स्वप्रकाशत्वम्]

ननु नैव ग्राह्यग्राहकयोरन्यत्वमिति यो ऽयं "ग्राह्यावभासः" इति भवताऽभ्युपगतः, स एव ग्राहकावभासः। ग्राहकादन्यो हि ग्राह्यो जडात्मा भवेत्। ग्राहकस्तु प्रकाशस्वभावः, ग्राहकत्वादेव।

---

**1** यद्यपि ] GMNSV$C_1$; यदपि $A_1$; यद्यपि च $B_1$ **1** अयमर्थः ] MNSV$C_1$; अर्थ G; अयमयं $A_1$; अयमर्थर् $B_1$ **2** °भासो ] GMNSV$B_1C_1$; °भासे $A_1$ **2** तथा° ] GMNSV$A_1C_1$; तदा° $B_1$ **2** एको ] GMNSV$A_1C_1$; एके $B_1$ **2** °कारः ] GMNSV$C_1$; °कार $A_1B_1$ **3** प्रकाश्य एव ] MN$C_1$; प्रकाश एव GSV$A_1$; प्रकाश $B_1$ **3** प्रकाशकः ] GMNSV$A_1B_1$; प्रकाशे $C_1$ **5** ऽस्तीति ] MNV$A_1B_1C_1$; ऽस्ति SG **7** प्रकाश्यस्य ] GMNSV; प्रकाशस्य $A_1B_1$; प्राकाश्यस्य $C_1$ **7** °बोधाधीनं ] GMNSV$C_1$; °वोधाहीनं $A_1$; °नीलाभेदं $B_1$ **7** युक्तं ] GMNSV$A_1C_1$; युक्तमिति $B_1$ **8** तदा ] GMNSV$A_1B_1$; om. $C_1$ **9** अनवस्था° ] GMNSV; अवस्था° $A_1B_1$; अनवस्थात् $C_1$ **9** नापि ] GMNSV$A_1B_1$; न हि $C_1$ **9** स्वप्रकाशं ] GMNSV$B_1C_1$; स्वप्रकाश $A_1$ **12** °रन्यत्वमिति ] GMNSV$A_1B_1$; °रन्यत्वं $C_1$ **12** ग्राह्याव° ] GMNSV$B_1C_1$; ग्राह्यव° $A_1$ **13** हि ] GMNSV$A_1C_1$; हि भासो $B_1$ **14** जडात्मा ] GMNSV$A_1C_1$; जनात्मा $B_1$ **14** ग्राहकस्तु ] GMNSV$B_1C_1$; ग्राहकस्त $A_1$

द्वयप्रतिभासश्च नास्तीत्युक्तम्। तत्रान्यतरस्य प्रकाशने जडप्रकाशयोः कतरस्यावभासितुं युक्तमिति चिन्तायां बलात्प्रकाश एव प्रकाशते, न जडः। निराकारश्च न प्रकाशः प्रकाशत इति तस्मिन् साकारे प्रकाशमाने कुतो जडात्मा तदतिरिक्तो ऽर्थः स्यात्।

[4.1.3.2 ज्ञानं न स्वप्रकाशं चक्षुर्वत्]

तदिदमपेशलम्, उपायेनोपेयनिह्नवस्याशक्यकरणीयत्वात्। रूपस्य हि प्रकाशकं चक्षुः। न "चक्षुरेव प्रकाशताम्" इत्युक्त्वा रूपमपह्नोतुं शक्यते। तदिदमर्थस्य मूर्तिद्रवत्वकाठिन्यादिधर्मविशेषि-

---

8 तदिदमर्थस्य मूर्तिद्रवत्व° ] *Nyāyamañjarīgranthibhaṅga*: तदिदमर्थस्य मूर्तिद्रवत्वेति।

---

1 तत्रा° ] MB$_1$; ततो ऽ° GSV; अतो ऽ° N; तता° A$_1$; तत्रान्यतत्रा° C$_1$ 1 प्रकाशने ] GSVA$_1$B$_1$; प्रतिभासने MNC$_1$ 2 °वभासितुं ] GMNSVA$_1$B$_1$; °वभासयितुं C$_1$ 3 प्रकाशः ] GMSVA$_1$B$_1$C$_1$; om. NS$^2$ 3 °त इति ] GMNSVA$_1$C$_1$; °ते। B$_1$ 3 साकारे ] GMNSVA$_1$C$_1$; सकारे B$_1$ 4 प्रकाशमाने ] GNSVA$_1$B$_1$; प्रकाश्यमाने M; प्रकाश्यमाने प्रकाशे C$_1$ 4 कुतो ] MNVA$_1$B$_1$C$_1$; ततो G; चतो S; चेता S$^2$ 4 तदतिरिक्तो ] GMNSVC$_1$; तदिरिक्तो A$_1$; तदितिरिक्तो B$_1$ 6 °मपेशल° ] GMNSVA$_1$B$_1$; °मापेशल° C$_1$ 6 °नोपेय° ] GMNSVB$_1$C$_1$; °नोपद्य° A$_1$ 6 °शक्य° ] GMNSVC$_1$; °शक्यं A$_1$; °त् शक्य° B$_1$ 7 चक्षुः ] GMNSVB$_1$C$_1$; क्षक्षुर् S$^2$; चक्षु A$_1$ 7 न ] GMNSVB$_1$C$_1$; नं A$_1$ 8 °मपह्नोतुं ] GMNSV; °मह्नोतुं A$_1$; °मह्नोतु B$_1$; °मपहौतुं C$_1$ 8 शक्यते ] GMNSVB$_1$C$_1$; शक्यत् A$_1$ 8 तदिद° ] GMNSVB$_1$C$_1$; न तदिद° A$_1$ 8 °मर्थस्य ] GMNSVA$_1$C$_1$; °मर्थस्य रूपस्य B$_1$ 8 °काठिन्या° ] GMNSVB$_1$C$_1$; °काटिन्या° A$_1$

तात्मनस् तद्विपरीतस्वच्छस्वभावं ज्ञानं प्रकाशकम्, न तदेव चक्षुर्वत् तथाऽवभासितुमर्हति।

[4.1.3.3 चक्षुर्ज्ञानयोर्वैषम्यम्]

ननु न चक्षुर्वद् उपायत्वं ज्ञानस्य, प्रकाशस्वभावत्वात्। चक्षुर्जन्यो हि प्रकाशो नाम ज्ञानमुच्यते। न चागृहीतः प्रकाशः प्रकाश्यं प्रकाशयतीति।

[4.1.3.4 प्रकाशो रूपादिविषयप्रकाशः, न प्रकाशप्रकाशः]

सत्यम्। चक्षुर्जन्यः प्रकाशो ज्ञानमुच्यते। स तु प्रकाशो रूपादि-

---

8 स तु ··· प्रकाशप्रकाशः ] Cf. *Ślokavārttika śūnya*, v. 184ab: व्यापृतं चार्थसंवित्तौ ज्ञानं नात्मानमृच्छति; v. 185: ईदृशं वा प्रकाशत्वं तस्यार्थानुभवात्मकम्। न चात्मानुभवो ऽस्त्यस्येत्यात्मनो न प्रकाशकम्; v. 187ab: प्रकाशकत्वं बाह्ये ऽर्थे, शक्त्यभावात्तु नात्मनि।

---

1 °विशेषिता° ] GMNSVC$_1$; °विशेषना° A$_1$; °विशेषता° B$_1$ 1 °स्वच्छस्वभावं ] GMNSVB$_1$C$_1$; °स्वच्छभावं A$_1$ 1 ज्ञानं ] GMNSVA$_1$C$_1$; ज्ञान B$_1$ 1 प्रकाशकम्, न तदेव चक्षुर्वत् तथाऽवभासितुमर्हति। ननु न चक्षुर्वद् उपायत्वं ज्ञानस्य, प्रकाशस्वभावत्वात् ] em.; प्रकाशकम्, न तदेव चक्षुर्वत् तदाऽवभासितुमर्हति च। ननु चक्षुर्वद् उपायत्वं ज्ञानस्य प्रकाशस्वभावत्वात् MC$_1$; प्रकाशकं, न तदेव चक्षुर्वत् तदाऽवभासितुमर्हति च। ननु न चक्षुर्वत् उपायत्वं ज्ञानस्य N; प्रकाशकम् स्वभावत्वात् GSV(eyeskip); प्रकाशकस्वभावत्वात् A$_1$(eyeskip); प्रोकाशकं न तदेवं चक्षुर्वत्तदवभासितुमर्हति। ननु न चक्षुर्वदुपायत्वं ज्ञानस्य प्रकाशस्वभावत्वात् B$_1$ 5 हि ] GMNSVA$_1$C$_1$; om. B$_1$ 5 प्रकाशो ] GMNSVA$_1$B$_1$; प्रकाशका C$_1$ 5 चागृहीतः ] GMNSVA$_1$C$_1$; चाग्रहीतः B$_1$ 5 प्रकाशः ] GMNSVB$_1$C$_1$; प्रकाशा A$_1$ 5 प्रकाश्यं ] GMNSVC$_1$; प्रकाश्य A$_1$; प्रकाशं B$_1$ 6 प्रकाशयतीति ] GMNSVA$_1$C$_1$; प्रकाशयंतीति B$_1$ 8 सत्यम् ] MNC$_1$; om. GSVA$_1$B$_1$ 8 °मुच्यते ] GSVA$_1$B$_1$; °मिष्यते MNC$_1$ 8 स तु ··· किमिति नीलमेव कर्म° ] GMNSV$C_1^{pc}$; स तु ··· किमिति नीलमिव कर्म° B$_1$; स तु ··· किमिति नीलमेव $C_1^{ac}$; om. A$_1$(eyeskip)

विषयप्रकाशः, न प्रकाशप्रकाशः। न हि चक्षुषा प्रकाशः प्रकाश्यते, अपि तु रूपं प्रकाश्यते। तत्र यत् “रूपम्” इत्युच्यते, स विषयो ग्राह्यः। यत्तु “प्रकाश्यते” इत्युच्यते, स प्रकाशो ज्ञानं ग्राहकम्। तदुत्पत्तिमात्रेण च रूपं प्रकाशितं भवतीति न प्रकाशो ग्रहणमपेक्षते। ननूक्तम्

अत्र नानुपलब्धायां बुद्धावर्थः प्रकाशते।
अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यति॥

इति। तदयुक्तम्। अप्रत्यक्षोपलम्भस्यैव प्रत्युतार्थदृष्टिः प्रसिध्यति। उपलम्भोत्पाद एवार्थदृष्टिः, न पुनरुपलम्भदृष्टिः। ननूपलब्धेरग्रहणे तदुत्पा दानुत्पादयोरविशेषाद् अनुत्पन्नोपलम्भस्याप्यर्थः प्रत्यक्षः स्यादिति सर्वसर्वज्ञत्वप्रसङ्गः। तदिदमतिसुभाषितम्। अर्थप्रकाशात्मैव खलूपलम्भः। स कथम् उत्पन्नाद् अनुत्पन्नो न विशेष्यते। तस्माद् अर्थप्रत्यक्षीकरणात्मकत्वाज्ज्ञानस्य तदुत्पाद एवार्थप्रत्यक्षता, न तद्ग्रहणम् — इत्यगृहीतमेव ज्ञानमर्थप्रकाशकमिति युक्तम्।

---

7 अप्रत्यक्षो° ··· प्रसिध्यति ] *Pramāṇaviniścaya* I 55cd

---

1 न प्र° ] GMNSV$B_1$; नाम प्र° $C_1$　1 चक्षुषा ] GMN$B_1C_1$; चक्षुषः SV　1 प्रकाश्यते ] GMNSV$C_1$; प्रकाशते $B_1$　2 °पम्” इत्युच्यते ] GNSV$B_1C_1$; °पमुच्यते M　3 ग्राह्यः ] GMNSV$B_1$; ग्राह्याः $C_1$　3 यत्तु ] $C_1$; यत्तत् GMNSV$B_1$　3 प्रकाश्यते ] $S^2B_1$; प्रकाशते GMNSV$C_1$　4 प्रकाशितं ] GMNSV$C_1$; प्रकाशित $B_1$　8 अप्रत्यक्षोपलम्भस्यैव ] $B_1$; अप्रत्यक्षोपलम्भस्य च GMNSV; तस्य $C_1$　8 प्रसिध्यति ] MN$B_1C_1$; सिध्यति GSV　10 °दानुत्पादयोरविशेषाद् अनुत्प° ] MN; °द उत्प° GSV; °दनुत्पादयोरविशेषाद् अनुत्प° $B_1$; °दानुत्पादयोरविशेषादुत्प° $C_1$　10 °पलम्भ° ] GMNSV$C_1$; °पलंब° $B_1$　12 कथम् उत्पन्नाद् अनुत्पन्नो न ] M$C_1$; कथमनुत्पन्नादुत्पन्नेन GSV$B_1$; कथमनुत्पन्नादुत्पन्नो न N　12 विशेष्यते ] GSV$B_1$; विशिष्येत MN; विशेष्येत $C_1$　13 °स्य तदुत्पाद ] M$B_1C_1$; °स्य उत्पाद GNSV　14 °गृहीतमेव ] GMNSV$C_1$; °ग्रहीतमेव $B_1$　14 युक्तम् ] GMNSV$C_1$; युक्त $B_1$

## [4.2 उपायत्वादित्यत्रोत्तरम्]

यत्तूपायत्वाज्ज्ञानस्य पूर्वं ग्रहणमुच्यते, तच्चक्षुरादिभिरनैकान्तिकम् इत्युक्तम्।

गृहीतं यदि च ज्ञानं भवेदर्थप्रकाशकम्।
धूमवद्दीपवद्वेति वक्तव्यं, यदि धूमवत्॥
भवेदर्थानुमेयत्वं, यत्त्वयैव च दूषितम्।
आकारद्वयसंवित्तिविरहान्न च दीपवत्॥
घटं दीपेन पश्यामीत्यस्ति द्वितयवेदनम्।
न तु ज्ञानेन विज्ञेयं जानामीति द्वयग्रहः॥

## [4.3 प्रकाशकत्वसमीक्षा]

### [4.3.1 प्रकाशत्वादिति को ऽर्थः]

यदपि प्रकाशत्वाज्ज्ञानस्य प्रदीपवत्पूर्वं ग्रहणमुक्तम्, तदपि व्याख्येयम्। "प्रकाशत्वात्" इति को ऽर्थः। "प्रकाशयति" इति प्र-

---

**2** यत्तूपाय° … इत्युक्तम् ] Cf. *Ślokavārttika śūnya*, v. 179cd–180ab: उपायत्वाच्च यत्तस्य पूर्वग्रहणकल्पनम्। चक्षुरादीन्द्रियैरत्र तदनैकान्तिकं भवेत्॥
**6** भवेद° … दूषितम् ] *Nyāyamañjarīgranthibhaṅga*: भवेदर्थानुमेयत्वं यत्त्वयैव च दूषितमिति।
**13** "प्रकाशयति" … प्रकाशत्वमिति ] Cf. *Ślokavārttika śūnya*, v. 184 (first interpretation): व्यापृतं चार्थसंवित्तौ ज्ञानं नात्मानमृच्छति। तेन प्रकाशकत्वे ऽपि बोधायान्यत्प्रतीक्षते॥

---

**2** यत्तूपाय° ] $MNB_1C_1$; यत्त्वरूप° GSV **2** तच्चक्षु° ] GMNSV; तश्च° $B_1$; तत्चु° $C_1$ **4** गृहीतं ] $GMNSVC_1$; ग्रहीतं $B_1$ **5** °वद्वेति ] $MNB_1C_1$; °वच्चेति GSV **6** यत्त्व° ] $GNSVB_1$; तत्त्व° M; तत्त° $C_1$ **6** च ] $GMNSVC_1$; स $B_1$ **7** °विरहान्न ] $GMNSVC_1$; °विहारान्न $B_1$ **8** दीपेन ] $MNB_1C_1$; दीपं च GSV **8** द्वितय° ] $GMNSVC_1$; द्वितीय° $B_1$ **12** प्रदीप° ] $MC_1$; दीप° $GNSVB_1$ **12** °वत्पूर्वं ] $MB_1C_1$; °वत्पूर्व° GNSV **13** प्रकाशत्वा° ] $GMNSVB_1$; प्रकाशकत्वा° $C_1$

काशः, तस्य भावः प्रकाशत्वमिति। तच् चक्षुरादिभिरनैकान्तिकम् उक्तमेव। अथ प्रकाशनं प्रकाशः, तर्हि "प्रकाशत्वात्" इत्यसिद्धो हेतुः। न ह्यर्थग्रहणकाले बुद्धेः प्रकाशनमस्ति। अथ प्रकाशशब्दो बोधपर्याय एव "प्रकाशत्वात्" "बोधरूपत्वात्" इत्यर्थः, तदा साधनविकलो दृष्टान्तः, प्रदीपस्य बोधरूपत्वाभावात्॥ अतश्च स्वसंवेदनपक्षो न युक्तियुक्तः, स्वप्रकाशस्य कस्यचिदप्यदृष्टत्वात्।

[4.3.2 त्रयः स्वप्रकाशा इत्यत्र दूषणम्]

ननु ज्ञानशब्ददीपास् त्रयः प्रकाशाः स्वपरप्रकाशा इत्याहुः। तदयुक्तम्, शब्ददीपयोः स्वग्रहणे ऽर्थप्रकाशने च सामग्र्यन्तरसव्यपेक्षत्वात्। शब्दो ऽर्थप्रकाशने समयग्रहणमपेक्षते, स्वप्रकाशने च श्रोत्रम्। दीपो ऽपि चक्षुराद्यपेक्ष एव गृह्यते ग्राहयति चार्थ-

---

2 अथ ··· प्रकाशनमस्ति ] Cf. *Ślokavārttika śūnya*, v. 185 (second interpretation): ईदृशं वा प्रकाशत्वं तस्यार्थानुभवात्मकम्। न चात्मानुभवो ऽस्त्यस्येत्यात्मनो न प्रकाशकम्॥

8 ननु ··· इत्याहुः ] *Vākyapadīya svavṛtti* I 12 (Iyer 1966:43.1–2): इह त्रीणि ज्योतींषि त्रयः प्रकाशाः स्वरूपपररूपयोरवद्योतकाः।

---

**1** प्रकाशः, तस्य भावः ] $MNB_1C_1$; om. GSV **1** तच् ] $GMNSVB_1$; om. $C_1$ **2** प्रकाशनं ] $GMNSVC_1$; प्रकाशकं $B_1$ **2** °त्यसिद्धो ] $GMNSVB_1$; °त्यवसिद्धो $C_1$ **4** एव ] $GMNSVC_1$; एवं $B_1$ **4** बोधरूप° ] $GMNSVB_1$; न बोधरूप° $M^{ca}C_1$ **5** तदा ] $GMNSVC_1$; तद $B_1$ **5** प्रदीपस्य ] $GMNSVB_1$; दीपस्य $C_1$ **6** युक्ति° ] $GMNSVC_1$; युक्तिः $B_1$ **6** स्वप्रकाशस्य ] GSV; स्वप्रकाशकस्य $B_1$; स्वतःप्रकाशस्य $MNC_1$ **8** °शब्द° ] $GMNSVC_1$; °शब्दः $B_1$ **8** °दीपास् ] $GMNSVC_1$; °दीपः $B_1$ **8** त्रयः प्रकाशाः ] $GM^{ca}SV$; त्रयः $MNC_1$; त्रयः प्रकाशः $B_1$ **8** स्वपरप्रकाशा ] $GMNSVC_1$; स्वपरप्रकाशः $B_1$ **9** तदयुक्तम् ] $GMNSVB_1$; तदुक्तं $C_1$ **9** °हणे ऽर्थ° ] GMNSV; °हणे ऽर्थः $B_1$; °हे चार्थ° $C_1$ **10** °ग्र्यन्तरसव्यपेक्ष° ] GMNSV; °ग्र्यंतसव्यपेक्ष° $B_1$; °ग्र्यन्तरापेक्षि° $C_1$ **10** ऽर्थ° ] $GMNSVC_1$; ऽर्थं $B_1$ **11** °शने च ] $GNSVB_1$; °शने तु M; °शे तु $C_1$ **11** श्रोत्रम् ] $MNC_1$; श्रोत्रादि $GM^{ca}SVB_1$ **11** गृह्यते ] $GMNSVC_1$; ग्रह्यते $B_1$

म्। इयांस्तु विशेषः — घटादिग्रहण आलोकसापेक्षं चक्षुः प्रवर्तते, आलोकग्रहणे तु निरपेक्षम् इति। नैतावता दीपस्य स्वप्रकाशता स्यात्। इत्थं च मार्जारादिनक्तंचरचक्षुरपेक्षया सर्व एव घटादयः स्वप्रकाशाः स्युः। ज्ञानस्य तु परप्रकाशत्वमेव दृश्यते, न स्वप्रकाशत्वम्, अर्थप्रकाशकाले तदप्रकाशस्य दर्शितत्वात्॥

मुधैव तस्माङ्गणितास्त एते त्रयः प्रकाशाः स्वपरप्रकाशाः।
प्रदीपबोधध्वनिनामधेया विभिन्नसामग्र्यभिवेद्यवेदकाः॥

---

**1 दीपो** ··· **चार्थम्** ] *Ślokavārttika śūnya*, vv. 65–67ab: अग्न्यादयो घटादीनां प्रसिद्धा ये प्रकाशकाः। न ते प्रकाश्यरूपा हि, प्रकाशस्यानपेक्षणात्॥ ग्राह्यत्वं तु यदा तेषां, तदाऽक्षं ग्राहकं मतम्। अक्षग्रहणकाले तु ग्राहिका धीर्भविष्यति॥ तस्यां तु गृह्यमाणायामन्या धीर्ग्राहिकेष्यते।

**4 सर्व** ··· **स्युः** ] *Nyāyamañjarīgranthibhaṅga*: सर्व एव घटादयः स्वप्रकाशाः स्युरिति।

**5 ज्ञानस्य** ··· **स्वप्रकाशत्वम्** ] Cf. *Ślokavārttika śūnya*, v. 187ab: प्रकाशकत्वं बाह्ये ऽर्थे, शक्त्यभावात्तु नात्मनि।

**6 मुधैव** ··· **॰वेदकाः॥** Upendravajrā (The last syllable of d is superfluous.)

---

**1 विशेषः** ] GMNSV; विशो $B_1$; विशेषा $C_1$ **1 घटादि॰** ] $GMNSVC_1$; घज्ञाति॰ $B_1$ **1 आलोक॰** ] $GMNSVB_1$; आलोकादि॰ $C_1$ **3 ॰चर॰** ] $GMNSVC_1$; ॰च॰ $B_1$ **3 ॰रपेक्षया** ] $GMNSVC_1$; ॰रापेक्षया $B_1$ **3 सर्व** ] $GMNSVB_1$; सर्वत $C_1$ **4 स्वप्रकाशाः** ] $GMNSVC_1$; स्वप्रकाशः $B_1$ **4 ज्ञानस्य तु** ] $GNSVB_1C_1$; ज्ञानस्य M **4 परप्रकाशत्वमेव** ] SV; परप्रकाश्यत्वमेव G; परप्रकाशकत्वमेव $MNC_1$; प्रकाशमेव $B_1$ **5 स्वप्रकाशत्वम्** ] $GSVB_1C_1$; स्वप्रकाशकत्वम् MN **5 अर्थप्रकाश॰** ] $GMNSVB_1$; अर्थप्रकाशन॰ $C_1$ **6 ॰ङ्गणितास्त** ] N; ॰ङ्गणितस्त M; ॰ङ्गणितास्त GS; ॰ङ्गुणितास्त $VC_1$; ॰ङ्गणितास्तम् $B_1$ **6 प्रकाशाः** ] $GMSVC_1$; प्रकाराः N; प्रकाशः $B_1$ **6 स्वपरप्रकाशाः** ] $GMNSVC_1$; om. $S^2$; स्वपरप्रकाशः $B_1$ **7 प्रदीप॰** ··· **॰वेदकाः** ] $MNC_1$; om. $GSVB_1$

### [4.3.3 आत्मप्रत्यक्षे ऽपि ग्राह्यग्राहकयोः कथंचिद् भेदः]

आत्मप्रत्यक्षवादिनां त्ववस्थाभेदेन ग्राह्यग्राहकांशयोर्भेदो विद्यत एवेति सर्वथा न स्वप्रकाशं ज्ञानम्।

## [4.4 प्रकाशरूपत्वात् प्रतिबन्धकाभावाच्चेत्यत्रोत्तरम्]

### [4.4.1 ज्ञानग्रहणसामग्र्यपेक्षा]

यदप्यभिहितम् — उत्पद्यमानमेव ज्ञानम् अनपेक्षत्वाद् अप्रतिबन्धत्वाच्च तदैव गृह्यते, न वा कदाचित् — इति, तदपि न सांप्रतम्, तदानीं तद्ग्रहणसामग्र्यभावात्।

न चाविबन्धमात्रेण प्रतीतिरवगम्यते।
उपायविरहेणापि तदा ज्ञानस्य न ग्रहः॥

---

**2** आत्मप्रत्यक्ष° ··· एवेति ] *Ślokavārttika śūnya*, vv. 67cd–68: नन्वात्मा ग्राहको ग्राह्यो भवताऽभ्युपगम्यते॥ कथंचिद् धर्मरूपेण भिन्नत्वात्प्रत्ययस्य तत्। ग्राहकत्वं भवेत्तत्र, ग्राह्यं द्रव्यादि चात्मनः॥
**6** उत्पद्यमानमेव ··· °सामग्र्यभावात् ] *Ślokavārttika śūnya*, vv. 180cd–181: यदप्यप्रतिबद्धत्वादुत्पत्तौ गृह्यतामिति॥ तत्रात्मना न शक्यं तन्, नान्योत्पत्तिस्तदस्ति च। तेनैतत्कारणाभावात् तदानीं नानुभूयते॥
**9** न चा° ··· ग्रहः ] *Ślokavārttika śūnya*, v. 183: न चापि प्रतिबन्धेन केवलेनाग्रहो भवेत्। विशिष्टकारणाभावे ऽप्यर्थो नैवानुभूयते॥

---

**2** °प्रत्यक्ष° ] GMNSB$_1$C$_1$; °प्रत्यक्षं° V **2** °योर्भेदो ] GMNSVC$_1$; °योभेदे B$_1$ **2** विद्यत ] GMNSVC$_1$; विद्येते B$_1$ **3** ज्ञानम् ] MC$_1$; विज्ञानं GNSVB$_1$ **6** उत्पद्यमानमेव ] GMNSVC$_1$; उत्पाद्यमानमिव B$_1$ **7** अप्रतिबन्धत्वाच्च ] GMNSVC$_1$; अप्रत्तिबन्धत्वाच्च S$^2$; अविबंधात्वाच्च B$_1$ **7** गृह्यते ] GMNSVC$_1$; ग्रह्यते B$_1$ **8** तदपि न सांप्रतम् ] em.; तदप्यसांप्रतम् MC$_1$; तन्न साम्प्रतम् GNSV; तदपि सांप्रतं B$_1$ **9** °विबन्ध° ] GMNSVB$_1$; °वबन्ध° C$_1$ **9** °रवगम्यते ] GNSVB$_1$; °रवकल्पते MC$_1$ **10** उपाय° ] GMNSVB$_1$C$_1$; उपय° S$^2$ **10** °विरहेणापि ] GMNSVC$_1$; °विरहेनापि B$_1$

### [4.4.2 नित्यपरोक्षज्ञाननिरासः]

न च जैमिनीया इव वयं ज्ञानं नित्यपरोक्षमाचक्ष्महे। “ज्ञातो मयाऽयमर्थः” इति कालान्तरे तद्विशिष्टार्थग्रहणदर्शनात्।

“शुक्लः पट” इति ज्ञाने यथाऽसौ भाति तद्गुणः।
तथा “ज्ञातो ऽर्थ” इत्यत्र भात्यर्थो धीविशेषणः॥
न विशेष्ये च संवित्तिरगृहीतविशेषणा।
नानुसायधियं वेत्थं प्रतीयेत क्रमाग्रहात्॥

“न च नित्यपरोक्षा बुद्धिरनुमातुमपि शक्यते” इति च विचारितमेव। तदलमनया कथया। किमिति शाक्यमुत्सृज्य श्रोत्रियमिदानीमभियुञ्ज्महे।

### [4.5 प्रत्यवमर्शसमर्थनम्]

अतश्च यदुक्तं ज्ञानपृष्ठावमर्शदर्शनाज् ज्ञानग्रहणपूर्वकमर्थग्रहण-

---

**9 विचारितमेव** ] *Nyāyamañjarī* I 53.6–7: यदि च नित्यपरोक्षो ज्ञातृव्यापारः, स तर्हि प्रतिबन्धाग्रहणादनुमातुमपि न शक्यः।
**12 अतश्च … सार्वत्रिकम्** ] Cf. *Ślokavārttika śūnya*, v. 199: ज्ञानपृष्ठेन यो ऽप्यूर्ध्वं परामर्शो भवत्यसौ। तस्यार्थेष्वभ्युपायत्वान्न तु ग्राह्यत्वकारितः॥

---

**2 इव** ] GMNSVC$_1$; एव B$_1$ **2 ज्ञानं** ] GMNSVC$_1$; ज्ञानि B$_1$ **3 कालान्तरे** ] GMNSVB$_1$; कालान्तरेण C$_1$ **3 °ग्रहण°** ] GMNSVC$_1$; °ग्रहणं B$_1$ **4 तद्गुणः** ] GMNSVC$_1$; तद्गुणाः B$_1$ **5 ऽर्थ** ] GMNSVC$_1$; ऽर्थं B$_1$ **6 विशेष्ये** ] GMNSVC$_1$; विशेषे B$_1$ **6 संवित्ति°** ] GMNSVC$_1$; सेविति° B$_1$ **6 °रगृहीत°** ] GMNSVC$_1$; °रग्रहीत° B$_1$ **6 °विशेषणा** ] GMNSVB$_1$; °विशेषणे C$_1$ **7 नानुसाय°** ] GMNSV; नानुसया° B$_1$; नानुमाय° C$_1$ **7 प्रतीयेत** ] GMNSVC$_1$; प्रतीतीयेत B$_1$ **7 क्रमा°** ] MNB$_1$C$_1$; भ्रमा° GSV **8 शक्यते** ] GNSVB$_1$C$_1$; न शक्यत M **8 च** ] GMNSVB$_1$; om. C$_1$ **9 शाक्यमु°** ] GMNSV; शक्यमु° B$_1$; शाक्यभिक्षुमु° C$_1$ **10 °मभियुञ्ज्महे** ] GNSV; °मनुयुंज्महे MC$_1$; °मभियुंजामहे B$_1$ **12 °पृष्ठा°** ] GMNSVC$_1$; °पृष्टा° B$_1$

मिति, तन्न सार्वत्रिकम्। अपि तु क्वचिदेव ज्ञानविशिष्टार्थसंवेदनात् तथाऽभ्युपगम्यते। तस्मादर्थग्रहणात्पूर्वं ज्ञानस्यानवभासान् निराकारत्वावसायविरहाच्च "ज्ञानस्यैवायमाकारः" इति कदाशाप्रलपितमेतद् अरुणाम्बराणाम्।

[4.6 कल्पनालाघवादित्यत्रोत्तरम्]

यत्पुनरभ्यधायि — ज्ञानाकारपक्षे कल्पनाऽल्पीयसी — इति, तत्र यथोक्तनीत्या प्रत्यक्षगम्ये बाह्ये ग्राह्ये ऽर्थाकारे कल्पनोक्तिः कीदृशी, कीदृशं वा तदल्पत्वं महत्त्वमिति।

[4.7 उभयसिद्धत्वादित्यत्रोत्तरम्]

उभयसिद्धत्वमपि यदवादि ज्ञानस्य, तत्र यदि प्रमाणायत्ता वस्तुस्थितिः, अर्थो ऽप्युभयसिद्ध एव। इच्छाद्वेषनिबन्धनायां तु वस्तुस्थितौ ज्ञानमपि कथमुभयसिद्धं स्यादिति यत्किंचिदेतत्।

---

**7** तत्र ··· कीदृशी ] *Ślokavārttika śūnya*, v. 178cd–179ab: न त्वत्र कारणं तादृक् शक्तिभेदकृदस्ति ते। तस्मादुभयसिद्धत्वलाघवाद्यपरिग्रहः॥

---

**1** सार्वत्रिकम् ] GMNSV$C_1$; सर्वत्रकम् $B_1$ **1** क्वचि° ] GMNSV$B_1$; कश्चि° $M^{ca}C_1$ **1** °विशिष्टा° ] MN$C_1$; °निष्ठा° GSV; °विष्टा° $B_1$ **2** ज्ञानस्यानव° ] GMNSV; ज्ञानव° $B_1$; ज्ञानंस्यानव° $C_1$ **3** निराकारत्वावसाय° ] GNSV; निराकारावसाय° M; निराकारतत्वासाय° $B_1$; निराकारतत्वावसाय° $C_1$ **3** °विरहाच्च ] GMNSV$C_1$; °विहाराच्च $B_1$ **3** °नस्यैवाय° ] GMNSV$B_1$; °नस्याय° $C_1$ **7** ग्राह्ये ] GMNSV; om. $M^{ca}C_1$; ग्राहे $B_1$ **8** कीदृशी, कीदृशं ] GMNSV$C_1$; कीदृशे कीदृशे $B_1$ **8** तदल्पत्वं ] GMNSV$B_1$; तदल्पत्व° $C_1$ **8** °त्त्वमिति ] GSV$B_1C_1$; °त्त्वं वेति MN **10** °सिद्धत्वमपि ] MN$C_1$; °सिद्धमपि GSV$B_1$ **11** अर्थो ऽप्यु° ] GMNSV$B_1$; अर्थो ह्यु° $C_1$ **12** °स्थितौ ] GMNSV$B_1$; °स्थित्यां $C_1$

## [4.8 प्रतिकर्मव्यवस्थासमर्थनम्]

यत्पुनरिदमभिहितम् — अभ्यु पगम्यापि बाह्यमर्थम् अप्रत्याख्येयः प्रतिकर्मव्यवस्थासिद्धये ज्ञानस्याकारयोगः — इति, तदपि न सांप्रतम्, प्रतिकर्मव्यवस्थायाः प्रकारान्तरेणाप्युपपत्तेः। यद्यप्यनेकसन्निधाने नीलज्ञानमुपजायते, यद्यपि च बोधरूपत्वमशेषसाधारणम्, तथाऽपि नीलेनैव कर्मकारकेण तदुपजनितमिति नीलनिष्ठमेवावतिष्ठते। चक्षुरादिनाऽपि तज् जनितमिति चेत्। सत्यं जनितम्, न तु कर्मणा सता। नीलेन तु कर्मभूतेन तदुत्पाद्यत इति तदेकविषयमेव भवति।

कुत एष नियम इति चेत्। वस्तुस्वभावकृत एव। आकारपक्षे ऽपि समानो ऽयं पर्यनुयोगः। यदुच्यते — किमिति नीलमेव कर्मकारकम्, किमिति वा कर्मविषयमेव ज्ञानम् — इति, तत्र वस्तुस्वभावैरुत्तरं वाच्यम्। आकारमपि च ज्ञानमुपाददानं कर्मकारक-

---

**6** यद्यपि च ··· °वतिष्ठते ] Cf. *Ślokavārttika śūnya*, vv. 116–117: तस्माज्ज्ञानात्मनैकत्वे ग्राह्यभेदनिबन्धनः। संवित्तिभेदः सिद्धो ऽत्र, किमाकारान्तरेण नः॥ निराकारत्वसाम्ये ऽपि यथाकारवतां ध्रुवम्। भेदः स्वाभाविकस्, तद्वज्ज्ञानानां किं न सिध्यति॥

---

**2** बाह्यमर्थम् ] GMNSVB$_1$; बाह्यम् S$^2$; बाह्यार्थम् C$_1$ **4** °पपत्तेः ] GMNSVC$_1$; °पपत्तौः B$_1$ **5** यद्यप्य° ] MN; यदप्य° GM$^{gha}$M$^{ca}$SVB$_1$C$_1$ **5** °धाने ] GMNSVC$_1$; °धानी B$_1$ **5** यद्यपि च ] MNC$_1$; यद्यपि GSVB$_1$ **5** बोधरूप° ] GNSVB$_1$; बोधस्वरूप° MC$_1$ **6** नीलेनैव ] GMNSVC$_1$; नीलोनैव B$_1$ **6** °कारकेण ] GMNSVC$_1$; °कारकेन B$_1$ **7** °निष्ठ° ] GMNSVC$_1$; °निष्ट° B$_1$ **7** °तिष्ठते ] GMNSVC$_1$; °तिष्टते B$_1$ **8** न तु कर्मणा सता। नीलेन तु ] M; न तु GSV(eyeskip); न तु कर्मणा सत्ता नीलेन तु B$_1$; न कर्मणा नीलेन C$_1$ **10** नियम इति ] GMNSVC$_1$; नियममिति B$_1$ **10** °वकृत ] MNB$_1$C$_1$; °व S$^2$; °वत GSV **11** पर्यनुयोगः ] GMNSVC$_1$; पर्यनुयोगाः B$_1$ **11** यदुच्यते ] GMNSVB$_1$; यदुच्येत C$_1$ **11** नीलमेव ] GMNSVC$_1$; नीलमिव B$_1$ **12** कर्म° ] GMNSVB$_1$C$_1^{pc}$; om. C$_1^{ac}$ **13** °वैरुत्तरं ] GMNSVB$_1$; °वैरांतरं A$_1$; °वैरुक्तं C$_1$ **13** °नमुपा° ] GMNSVA$_1$; °नमपा° B$_1$; °नमुपपा° C$_1$

स्यैव कथमुपाददीत, न कारकान्तरस्य — इत्यत्रापि वस्तुस्वभाव एव शरणमिति।

अर्थस्य च ज्ञानजनकत्वम् अन्वयव्यतिरेकाभ्यामवगम्यते।

यदा हि देवदत्तार्थी कश्चिद् व्रजति तद्गृहम्।
तत्रासन्निहितं चैनं गत्वाऽपि न स पश्यति॥
क्षणान्तरे स आयान्तं देवदत्तं निरीक्षते।
तत्र तत्सदसत्त्वेन तथात्वं वेत्ति तद्धियः॥

अनागते देवदत्ते न देवदत्तज्ञानमुदपादि, तस्मिन्नागते तदुत्पन्नम् इति तद्भावभावित्वात् तज्जन्यं तदवसीयते। इत्थं च तज्जन्यत्वेन तत्र नियमसिद्धेर् अलमाकारकल्पनया। एतेन पुरुषप्रवृत्तिरपि नियतविषया व्याख्याता॥ साधकतमत्वं तु सामग्र्याः प्रमाणसामान्यलक्षणे निर्णीतमेव।

---

**12** निर्णीतमेव ] *Nyāyamañjarī* I 32.13–15: यत एव साधकतमं करणं, करणसाधनश्च प्रमाणशब्दः, तत एव सामग्र्याः प्रमाणत्वं युक्तम्, तद्व्यतिरेकेण कारकान्तरे क्वचिदपि तमबर्थसंस्पर्शानुपपत्तेः।

---

**1** °ददानं कर्मकारकस्यैव ] MNC$_1$; °ददानमर्थस्यैव GSVA$_1$B$_1$ **1** °रस्य — इत्यत्रापि ] GMNSVC$_1$; °रस्योन्यत्रापि A$_1$; °रस्येत्यन्यत्रापि B$_1$ **2** एव ] GMNSVA$_1$C$_1$; एष B$_1$ **4** हि ] GMNSVB$_1$C$_1$; दि A$_1$ **4** देवदत्तार्थी ] GMNSVB$_1$C$_1$; देवत्तार्थी A$_1$ **4** तद्गृहम् ] GMNSVA$_1$C$_1$; तद्ग्रहणं B$_1$ **5** गत्वाऽपि न स ] GMNSVA$_1$B$_1$; स गत्वापि न C$_1$ **6** क्षणान्तरे स आ° ] GMNSVA$_1$; क्षणांतरं स आ° B$_1$; क्षणान्तरेण चा° C$_1$ **6** °यान्तं ] GMNSVC$_1$; °यान्त° A$_1$B$_1$ **6** निरीक्षते ] GMNSVC$_1$; निरीक्ष्यते A$_1$B$_1$ **7** तत्सदसत्त्वेन ] GMNSVA$_1$C$_1$; सदसत्येन B$_1$ **7** तथात्वं वेत्ति ] GMNSVB$_1$C$_1$; तथात्वेत्ति A$_1$ **8** °मुदपादि ] GMNSVC$_1$; °मुपपादि A$_1$B$_1$ **8** °गते ] GNSVA$_1$; °गते च MC$_1$; °गत्ये B$_1$ **8** तदुत्पन्नम् ] GMNSVA$_1$C$_1$; तद्धियः उत्पन्नं B$_1$ **9** तज्जन्यं ] GMNSVA$_1$B$_1$; तज्जन्यः C$_1$ **10** तज्जन्यत्वेन ] GSVB$_1$C$_1$; तज्जन्यत्वेनैव MN; ज्जन्यत्वेन A$_1$ **10** अलमाकार° ] GMNSVA$_1$C$_1$; अलं सकार° B$_1$ **11** व्याख्याता ] GMNSVA$_1$B$_1$; व्याख्याताः C$_1$ **11** प्रमाण° ] GMNSVB$_1$C$_1$; प्रमा° A$_1$

### [4.9 लौकिकवचन उत्तरम्]

यस्तु लौकिको व्यपदेश उदाहृतः, सो ऽपि व्यभिचरति। "नीलो ऽर्थो ऽयम्, यतस्तद्विषयं ज्ञानमुत्पन्नम्" इत्यपि न न व्यपदिशन्ति लौकिकाः। तस्मादर्थे सत्यपि साकारं ज्ञानमेषितव्यमिति यदुक्तम्, तदनुपपन्नम्।

### [4.10 सहोपलम्भनियमनिरासः]

यदप्यवर्णि —

सहोपलम्भनियमादभेदो नीलतद्धियोः।

इति, तदपि बालभाषितमिव नः प्रतिभाति, अभेदे सहार्थानुपपत्तेः। अथ "एकोपलम्भनियमात्" इति हेत्वर्थो विवक्षितः, तदयमसिद्धो हेतुः, नीलादिग्राह्यग्रहणसमये तद्ग्राहकानुपलम्भात्। ग्रा-

---

**2** यस्तु ··· लौकिकाः ] Cf. *Ślokavārttika śūnya*, vv. 226–227: वदन्ति लौकिका यच्च यादृग्ज्ञानं तथा बहिः। ते ऽपि न ज्ञानसंवित्त्या तथाऽर्थं प्रतिजानते॥ ग्राहकत्वेन विज्ञानं यथाऽर्थं नः समर्पयेत्। तादृगर्थः स इत्येवं तेषां वाक् तदुपायतः॥
**8** सहोपलम्भ° ··· नीलतद्धियोः ] *Pramāṇaviniścaya* I 55ab

---

**2** लौकिको ] $MB_1C_1$; लौकिक° $GNSVA_1$ **2** व्यपदेश ] $GMNSVA_1C_1$; पदेश $B_1$ **2** उदाहृतः ] $GMNSVC_1$; उपाहृतः $A_1$; उदाहृत $B_1$ **3** ऽर्थो ऽयम् ] $MNB_1C_1$; ऽयम् GSV; ऽर्थंय $A_1$ **3** °मुत्पन्नम्" इत्यपि ] $GMNSVA_1C_1$; °मुत्पत्तिमित्यपि $B_1$ **3** न न ] $M^{ca}C_1$; न MN; न तद् GSV; न तु $A_1B_1$ **4** व्यपदिशन्ति ] $GMNSVA_1C_1$; व्यपदेशंति $B_1$ **8** सहोप° ] $GMNSVA_1B_1^{pc}C_1$; ससोहो° $B_1^{ac}$ **8** °लम्भ° ] $GMNSVA_1C_1$; °लंवि° $B_1$ **8** °तद्धियोः ] $GMNSVA_1B_1$; °तधितयोर् $C_1$(unmetrical) **9** प्रतिभा° ] $GMNSVC_1$; प्रत्यभा° $A_1B_1$ **10** अथ "एको° ] $GMNSVB_1C_1$; अर्थेको° $A_1$ **10** °पलम्भ° ] $GMNSVA_1C_1$; °पलंवनादि° $B_1$ **10** विवक्षितः ] $GMNSVA_1C_1$; विवक्षतः $B_1$ **11** नीलादि° ] $GMNSVA_1C_1$; नीलाद्य° $B_1$ **11** °ग्राह्य° ] $GMNSVA_1B_1C_1$; om. $S^2$ **11** °ग्रहण° ] $GMNSVA_1C_1$; °ग्राहण° $B_1$

हकाकारानुवेधरहिततद्विच्छिन्नबाह्यग्राह्यमात्रप्रतिभास एवायं “नीलमिदम्” इत्यादिर्दर्शितः। क्वचिच्च ग्राह्याकारानुपश्लिष्टकेवलग्राहकावमर्शनमपि दृश्यते ‘न स्मरामि “मया को ऽपि गृहीतो ऽर्थस्तदा”’ इति। तदेवमितरेतरविभक्तज्ञानार्थाकारसंवेदनात् कथम्

एकोपलम्भनियमादभेदो नीलतद्धियोः।

इत्युच्यते। “नीलतद्धियोः” इति च वदता भवताऽप्येष भेद एव निर्दिश्यते। परमतानुवादमात्रमेतदिति चेत्। न, अभेदे पृथङ्निर्देशस्याप्यघटमानत्वात्। तस्मादपि न ज्ञानस्यायमाकारः।

---

2 इत्यादिर्दर्शितः ] *Nyāyamañjarī* I 83.11: “नीलमिदम्” इति हि संवेद्यते, न पुनः “प्रत्यक्षमिदम्” इति; *Ślokavārttika śūnya*, v. 74: यदा तु ग्राह्यमाकारं नीलादि प्रतिपद्यते। न तदा ग्राहकाकारा संवित्तिर्दृश्यते क्वचित्॥

2 क्वचिच्च … इति ] *Ślokavārttika śūnya*, v. 76cd: शुद्धमेव निराकारं ग्राहकं संविदन्ति हि॥ vv. 82cd–83: ग्राहकस्यैव संवित्तिर्लक्ष्यते ग्रहणे क्वचित्॥ न स्मरामि मया को ऽपि गृहीतो ऽर्थस्तदेति हि। स्मरन्ति ग्राहकोत्पादं ग्राह्यरूपविवर्जितम्॥

4 तदेव° … °संवेदनात् ] *Ślokavārttika śūnya*, v. 85: तदत्यन्ताविनाभावान्नैकाकारं हि जायते। अन्वयव्यतिरेकाभ्यां सिद्धैवं भिन्नता तयोः॥

---

1 °नुवेध° ] GMNSV$A_1C_1$; °नुवेद° $B_1$ 1 °च्छिन्न° ] MN$C_1$; °च्छिन्नो GSV; °च्छिन्ने $A_1B_1$ 1 °ग्राह्य° ] GMNSV$A_1B_1C_1$; °ग्राह्° $S^2$ 2 °दिर्दर्शितः ] M; °दिनादर्शितः G; °दि दर्शितः $M^{ca}$NSV$A_1$; °दि दर्शिताः $B_1$; °दि दर्शितं $C_1$ 2 ग्राह्याका° ] GMNSV$C_1$; ग्राह्यका° $A_1$; ग्राह्यक° $B_1$ 4 °दा”’ इति ] MN$A_1B_1$; °देति हीति GSV; °देति हि $C_1$ 4 °विभक्त° ] GMNSV$A_1B_1$; °विविक्त° $C_1$ 4 °नार्थाकार° ] GMNSV$A_1B_1$; °नार्थ° $C_1$ 4 °संवेदनात् ] GMNSV$B_1C_1$; °सवेदांनात् $A_1$ 5 °कोपलम्भ° ] GMNSV$A_1C_1$; °कोपलंव° $B_1$ 6 इत्युच्यते। “नीलतद्धियोः” ] GMNSV$A_1B_1$; om. $C_1$(eyeskip) 6 इति च वदता भवताऽप्येष ] GNSV$B_1C_1$; इति वदता भवताऽप्येष M; इति च वदताप्येष $A_1$ 7 °दिति चे° ] GMNSV$B_1C_1$; °दिति च° $A_1$ 7 °भेदे ] GMNSV$B_1C_1$; °भेदै $A_1$ 8 न ] GMNSV$A_1B_1$; च $C_1$

## [4.11 स्वप्नादिज्ञानसमर्थनम्]

यदप्युक्तम् — असत्यपि बाह्ये ऽर्थे स्वप्नगन्धर्वनगरमायादिषु ज्ञानस्याकारवत्ता दृश्यत इति तस्यैवायमाकारो युक्तः — इति, तदपि दुराशामात्रम्। सर्वत्र ज्ञानाद्विच्छिन्नस्य ग्राह्याकारस्य प्रतिभासनात्।

---

**2** यदप्युक्तम् ··· प्रतिभासनात् ] *Ślokavārttika śūnya*, v. 201: अर्थाकारस्य यो ऽप्युक्तो मिथ्याज्ञानेष्वसंभवः। देशकालान्यथामात्रात् संभवः केषुचित् कृतः॥

---

**4** दुराशा° ] GMNSV$A_1C_1$ ; दुराश° $B_1$ **4** °स्य ग्राह्याकारस्य ] GNSV$C_1$ ; °स्वग्राह्याकारस्य M ; °स्य ग्राकारस्य $A_1$ ; °स्य ग्राहकारस्य $B_1$